तुत्वाभावादात्वाप्राप्तेस्तदसंगतिस्स्पष्टैवेति दिक्। क्वविषये ण्णोप्यापतेरिति। स्यादेतत् नानुबंधकृत
मसारूप्यं। अनुबंधप्रयोज्य एजंतत्वं न भवतीत्यर्थः। ज्ञापकमिति। नित्येत्र प्रत्ययेपि वासरूपन्यायेन पक्षे
अणोपि भवतीति विभाषाग्रहणं व्यर्थं स्यादिति भावः। वासरूपसूत्रे असारूप्यं औपदेशिकं अहोस्वि
त्प्रायोगिकं गृह्यते नाद्यः असरूपपदवैयर्थ्यापत्तेः नहि स्वेन स्वस्य बाधे फले विशेषः यथा कर्मण्यणि बा (केन्यणि)
ध्यत्वे न विशेषः। नान्त्यः। अनुबंधविनिर्मुक्तपदार्थोपस्थित्या प्रयोगे सारूप्यस्यैव सत्त्वात्। अवतरणासंग
त्यापत्तेरिति चेन्नैवं औपदेशिकसारूप्यग्रहणेनावतरणसंगतेः नचासरूपपदवैयर्थ्यमिति वाच्यं अभ्र
घन इत्यादौ घञ्वधादेश संनियोगशिष्टत्वस्याचरितार्थत्वात् नचैवमपि अनन्वितत्वेनैव सिद्धे असरूपपदं
व्यर्थमिति वाच्यं। तुंदपरिमृजः श्रीः कृन्नित्यादौ इगुपधेति कस्य क्विप्श्व। तुंदशोकयोः परिमृजाप

नुदोः। कृचिप्रच्छायत नन्तु कृटस्तज्श्रीणां दीर्घो संप्रसारणं चेति क्विब्भ्यां नित्यं बाधनेन असरूपपदस्य च
रितार्थत्वात्। अन्यथा तुंदपरिमृजः श्रितू कृस्तूत्वा प्राप्तेरिति दिक्। उभयगतिरिति। कृत्रिमाकृत्रिमोभ
यविज्ञानमित्यर्थः प्रकरणस्याभिधानियामकत्वं प्रसिद्धत्वादिति। अत्राभिधापदेन तात्पर्यं ग्राह्यं तथा चाभिधा
नियामकत्वादित्यस्य तात्पर्यनिर्णायकत्वादित्यर्थः। यत्त्वभिधापदेन शक्तिर्गृह्यत इति तन्न वैयाकरणमते शक्ते
र्बोधजनकता रूपत्वेन जनकतायास्स्वरूपयोग्यता रूपत्वाच्छब्दानां नित्यत्वेन तत्स्वरूपयोग्यतारूपकारणताया
अपि नित्यत्वेन तन्नियामकत्वासंभवात्। नैय्यायिकमतेपि शक्तेरीश्वरेच्छारूपत्वेन ईश्वरस्य नित्यत्वात्तदि
च्छाया अपि नित्यत्वेन तन्नियामकत्वासंभवाच्च पदपदार्थयोस्संबंधान्तरं शक्तिरिति वादिनां मीमांसकानां
मतेपि पदानां कूटस्थनित्यत्वेनार्थमपि प्रवाहनित्यत्वेन तत्संबंधस्यापि नित्यत्वे तन्नियामकत्वासंभवाच्च
पदपदार्थयोस्संबंधांतरं शक्तिरिति वादिनां मीमांसकानां मतेपि पदानां कूटस्थनित्यत्वेनार्थमपि प्रवाहनित्य
त्वेन तत्संबंधस्यापि नित्यत्वे तन्निरूपकत्वासंभवाच्चेति दिक्। इह शास्त्रे इति अवच्छेदकत्वं सप्तम्यर्थः त

था च क्वचित्कृत्रिमस्यैव। क्वचिदकृत्रिमस्यैव। क्वचिदुभयगतिरिति व्यवस्था सिध्यतीति भावः। तेनेति उभयगति
रिह भवतीति परिभाषास्वीकारेणेत्यर्थः। अत एवेति। लक्ष्यानुसारित्वेन क्वचित्कृत्रिमस्यैव। क्वचिदकृत्रिमस्ये
व क्वचिदुभयोरिति स्वीकारेणेत्यर्थः। नियमत्वायोगादिति। स्यादेतत्। इदं दधिपदं अर्थवाचकं। पदत्वात्। गोप
दवदित्यनुमानेनार्थवत्त्वेन रूपेणादेङ्प्रकारकादेङ्विशेष्यकशक्तिज्ञानस्य जायमानत्वेनादेङ्वाचकत्वस्या
श्रयत्वात्संज्ञाशास्त्राणां नियामकत्वं संभवत्येव। न चार्थवत्त्वस्योपलक्षणतया उपलक्षितधर्मप्रकारकशाब्दबो
धस्यानुदयात्संज्ञाशास्त्राणां नियामकत्वं न संभवतीति वाच्यं। विशेषधर्मप्रकारकशक्तिज्ञानाभावदशायां
मुपलक्षणीभूतधर्मप्रकारकशाब्दबोधस्यांगीकारेणैव नियामकत्वसंभवात्। अत एवानुमानपक्षे न दर्शनं तर
कमानयामीति प्रश्नस्संगच्छत इति चेन्मैवं स्वरूपत आदेङ्प्रकारकबोधं प्रति स्वरूपत आदेङ्प्रकारकशक्ति
ज्ञानस्य कारणत्वेन नादैच्शक्तिग्रहार्थं दधिरादेत्यादीनां विधायकत्वसंभवेन नियामकत्वायोगात्। ननु सर्वं

पदं सर्वार्थवाचकमिति व्याप्तिज्ञानबलेन इत्सैदं दधिपदमादैच्त्वावच्छिन्नवाचकं पदत्वादित्यनुमानेन स्वरू
पत आदैच्त्वप्रकारकशक्तिज्ञानस्य कारणत्वेन नादैच्शक्तिग्रहार्थं दधिरादैजित्यादीनां विधायकत्वसंभवे
ऽपि संभवत्येवेति संज्ञाशास्त्राणां नियामकत्वं संभवत्येवेति चेदाह। नास्मदादिदृष्ट्येति। विशिष्य सर्वशब्दार्थ
ज्ञानस्येति। यावद्विशेषधर्मप्रकारकज्ञानस्यासंभवादित्यर्थः सामान्यज्ञानमिति। सामान्यधर्मप्रकारकज्ञानमित्य
र्थः। न बोधोपयोगीति। विशेषधर्मप्रकारकबोधोपयोगि न भवतीत्यर्थः। सामान्यधर्मप्रकारकज्ञानं सामान्यधर्म
प्रकारकबोधं प्रत्येवोपयुज्यते। न विशेषधर्मप्रकारकबोधं प्रतीति यावत्। अन्यथा द्रव्यत्वप्रभावप्रकारकशक्तिज्ञानात्
घटत्वप्रकारकशाब्दबोधापत्तेरिति दिक्॥ गुणनिषेधस्यादिति॥ ॥क्ङितीत्यस्य तन्निमित्तग्रहणं कर्तव्य
मिति मिति वार्तिककसत्त्वे तोर्दस्यस्यापि निमित्तत्वेनाश्रयणादिति भावः। शायत इति। मृजु त्वजं न मेतत् ननु तन्त्रं तां
तत्वे निष्ठाशीङिति सूत्रे शीङः सामर्थ्येन गुणो भवतीति वक्तुं शक्यत्वादिति न च। परिभाषाया अभावे शीङ्ग्रहण
वैयर्थ्यस्यापि दोषत्वेन वक्तुं शक्यत्वात्। अत एवाग्रे तु तु समुच्चयार्थश्चकारस्संगच्छते। न च क्ङितीति चेत्तिसूत्रे

प्रश्लिष्टगसाहचर्यात्क्ङितिप्रत्ययस्यैवग्रहणे । इत्यैध्येनाध्यायनेत्यादौ न दोष इति वाच्यं एवमपि भञ्जेति कामय
ते हस्तावयवइत्यादौ ङितः प्रत्ययस्य संभवेन साहचर्याश्रयणेपि दोषस्य दुर्वारत्वात् । स्यादेतत् क्ङितिपरसप्तमीस्वी
काराच्च प्रकृते दोषः न च कवयति भरमकवयीत् इत्यादौ गुणनिषेधः स्यादिति वाच्यं अंतरंगे निषेधे कर्तव्ये बहिरंग
स्य गुणस्यासिद्धत्वेनादोषात् । न चैवमपि भिन्नमित्यादौ द्विसरत्वाद्भावेन गुणनिषेधो न स्यादिति वाच्यं क्ङितः द्वि
त्वेन एकवर्णव्यवधानसहनेनादोषादिति चेन्मैवं अंतरंगाद्युपजीवकत्वादपि निषेधो बलवानिति सेनदर्थे कङ्निषेधा
च्च बल्लीयान् सइति परिभाषया भवतइत्यादौ निषेधापत्तेः न च ज्ञापकसाजात्याद्धल्व्यवधानं सह्यत इति न दोष
इति वाच्यं अक्षैष्टामित्यादौ निषेधापत्तेः न च ज्ञापकसाजात्याद्धात्ववयववर्णव्यवधानं सह्यत इति प्रकृते न दोष इति
वाच्यं अक्ष्यक्षैष्टामित्यादौ निषेधापत्तेः न च धात्ववयववर्णव्यवधानं सह्यत इति प्रकृते न दोष इति वाच्यं गुनेत्यादौ
निषेधानापत्तिरिति दिक् । कार्यमनुभवन्निति । साक्षात्स्वावयवद्वारा वा कार्यानुभववत्त्ववानित्यर्थः । कार्यीति । उ
द्देश्यमित्यर्थः । निर्देश्येति । येन निष्ठा शीङ् इति रहत्रस्य शीङः संग्रहः अन्यथा शीङो ङित्वे न गुणनिषेधस्य

दुर्वारत्वात् तथा च ततः परनिष्ठायोः कित्त्वविधानं व्यर्थं स्यात् । ज्ञापकमिति । अन्यथा शीङः सार्वधातुकेस्तत्र शीङः द्देशस्ते
न तस्यापि निमित्तत्वेनाश्रयणे । [struck out] च्छयतरीत्यादौ क्ङितीति निषेधात् तदसंगतिः स्पष्टैव ॥ तस्येति समवायका
रणस्येत्यर्थः । तत्वेन । निमित्तकारणत्वेन । वस्तुतस्तु । चिंत्यमिदं । शब्दानां नित्यत्वेन शब्दं प्रति शब्दांतरस्य कारणस्य स
स्यैवासंभवेन समवायिकारणत्वादेः सुतरामसंभवात् । शब्दानामनित्यत्वकल्पेपि शब्दबुधिकर्मणां द्विक्षणावस्थायि
त्वेन स्वनाशोत्तरोत्पद्यमानशब्दं प्रति स्वस्य कारणत्वासंभवाच्च । शब्दस्य गुणत्वेन गुणकर्मणोरसमवायिकारणत्वमि
ति सिद्धांतेन शब्दस्य समवायिकारणत्वासंभवाच्च न्यायवैशेषिकमते समवायीकारणासमवायिकारणादिविभा
गाभावेन समवायिकारणनिमित्तकारणयोर्भेदस्य सकललोकतंत्रप्रसिद्ध[struck out]त्वादित्युक्तरसंगतश्च । न च पारनिमि
त्तिकत्वादेशात्सुतरसंगतेति वाच्यं । ज्ञाननिष्ठकारणत्वं विषये आरोप्य तादृशव्यवहारोपपत्त्यासंगतित्वाभावादि
ति दिक् । भाष्यवार्तिकयोरुपनिबद्धानीसस्य भाष्यवार्तिकसमतानीत्येवार्थः ननु भाष्यवार्तिकघटकानीत्यर्थ इति बोधय
न्नाह । भाष्येध्वनितेति । केचित्तु अचिकिं जेघ्रीयते देध्मीयते । इति भाष्यमेतत्परिभाषायास्तत्त्वेन संगच्छते । तथा
हि नटभार्याविर्भ्यंजनानिर्विभवंतिरितिन्यायेनाघ्रायरसस्य द्दित्वं तथा चावयवद्वारा युक्तस्यैव कार्यानुभववत्त्वं

त्वेन तस्यनिमित्तत्वेनाश्रयणाभावेन भाष्यासंगतिः स्पष्टैव। तथा च मूले भाष्ये अध्वनितत्वमिति च्छेदः स्यादुः। अन्ये तु
प्रकृतपरिभाषाप्राचीनपठिता। तत्र कार्यमनुभवन्निति संज्ञो भाष्ये ध्वनितः तथाहि लक्ष्यानुसारात्स्वरान्तरे व्यंजनान्तु
तरस्येति पक्षः स्वीक्रियते। तथा च अचिकीर्षिते प्रौथतेर्निति न भाष्यविरोधः। तथा च यदि कार्यमनुभवन्निति संज्ञो ना
भविष्यत्तर्हि सन्पुरोरिति षष्ठीत्वेन कार्यित्वात् तस्य निमित्तत्वेनाश्रयणं न भवतीत्यचिकीर्षिते प्रौथतेर्निति भाष्या
संगतिः। कार्यमनुभवन्नित्यंशसत्वे तु यशब्दस्य कार्यानुभवकर्तृत्वाभावात्तस्य निमित्तत्वेना ५१५१

श्रयणं भवत्येवेति कार्यमनुभवन्निति संज्ञो ध्वनितः स्यादुः। अत्रेदं तत्त्वं संपूर्णैव परिभाषा भाष्ये ध्वनिता तथाहि द्वि
र्वचने चीत्यस्य द्वित्वनिमित्ते अचि परतः स्थर्थो वा अजादौ द्वित्वनिमित्ते परतः स्थर्थो वा। नाधः च कृगुरित्यादौ नि
षेधापत्तेः नाप्यंत्यः जग्मतुरित्यादावुपधालोपनिषेधानापत्तेः तस्मात् यथाकथंचिद् द्वित्वनिमित्ताश्रयो योऽच् यस्य
निमित्तत्वादादेशो नेत्यर्थः तथा च सन्पुरोरिति षष्ठीत्वेन यत्तु तत्र घटकेषु सर्वेष्वपि यथाकथंचिद् द्वित्वनिमि
त्ताश्रयत्वसत्त्वेन तद्भार्यावश्यं व्यंजनानि भवन्तीति वृत्त्येव स्वरान्तरे व्यंजनान्तु तस्येति वृत्त्येव भाष्यासंगति
रिति संपूर्णपरिभाषाध्वननं स्पष्टमेव न चोर्णुनविषतीत्यादौ गुणनिषेधो न स्यात् गुणस्य यथाकथंचि
अ द्वित्वनिमित्ताश्रयोसियर्यत्ति निमित्तत्वाकृत्वाभावादिति वाच्यं। गुणस्य निषेधाभावेपि अवादेशस्य यथाक
थंचिद् द्वित्वनिमित्ताश्रयाचर्याप्ति निमित्तत्वाकृत्वेन तन्निषेधेन नुं शब्दस्य द्वित्वे ह्रस्वे च रूपसिद्धेः अत एव
ऊर्णुनविषतीत्यादौ गुणे रिशब्दस्य द्वित्वनिमित्तत्वसिद्धिः न चैवमपि दुधुवतीत्यादौ यण्णो यथा

कथंचिद्द्वित्वनिमित्ततात्राश्रयोऽपर्याप्तनिमित्ततात्वेन तन्निषेधेऽभ्यासे उकारेण श्रूयतइतिवाच्यं द्वि
र्वचनेऽचीति निषेधप्रवृत्तस्यावसंभावनायां यस्य कार्यानुभवकर्तृत्वं संभाव्यते तस्यापि निमित्तत्वेनाश्र
यणं न भवतीति परिभाषार्थकरणेनादोषात् अस्ति च प्रकृते यदि द्विर्वचनेऽचीति निषेधो न स्यात्तर्हि य
णि उठो द्वित्वरूपकार्यानुभवकर्तृत्वसंभावनेति दिक्। परे तु द्वित्वनिमित्ततापर्याप्त्यधिकरणायः प्रत्य
यस्तद्घटकाच्पर्याप्तनिमित्तत्वादेशो नेति द्विर्वचनेऽचीत्यस्यार्थ इति। अरिरिषतीत्युध्रपतीति नन्वूर्णनी
त्यादौ कुत्रापि न दोषः उठ ऋ कारयोर्द्वित्वनिमित्ततापर्याप्त्यधिकरणप्रत्ययाघटकत्वात् अत एव बि
भनतीयिषतीत्यादौ उपसंजनिष्यमाणन्यायेनावादेशनिषेधो न अध्ययत्ताशयतेत्यादौ परस्त्वस्या
श्रयणादेव न दोषः क्नोः वित्वकरणे न च यं प्रत्ययं निमित्तीकृत्य गुणो वा वृद्धिर्वा भवति तत्प्रत्ययाव्यवहि
तपूर्वो यस्तत्प्रत्ययः तदा च वयवो वर्णस्तद्ध्यवधाने सत्यपि न इति भवतः गुणा अक्षेष्टामित्यादौ कुत्रापि

परिभाषेन्दुशेखर टीका

॥ अर्थवद्ग्रहणे नानर्थकस्येति ॥ ॥ निरनुबंधकग्रहणे सानुबंधकस्य। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यै
व ग्रहणं प्रत्ययाप्रत्यययोरिति परिभाषाणामप्युपलक्षणमिदं अर्थवत्तानर्थकत्वे चेति। अभेदस्तृतीययोर
र्थः प्रत्ययाप्रत्यययोर्निरनुबंधकसानुबंधकयोर्लाक्षणिकप्रतिपदोक्तयोश्चाप्युपलक्षणमिदं तथा चार्थवंति अन
र्थकानि निरनुबंधकानि सानुबंधकानि च लाक्षणिकानि प्रतिपदोक्तानि प्रत्ययाप्रत्ययाश्चानि नस्मनस्त
दंतविधिं प्रयोजयंतीति भावः अनिनस्मनः ग्रहणेषु पदैः तानीत्यर्थः अन्ये तु अनिनस्मन् सुवर्णत
व्याप्यधर्मावच्छिन्नबोधकत्वमिति दिक्। एते अनया परिभाषया तथा चेतद्विषये लक्षणप्रतिपदोक्तनि
रनुबंधकप्रत्ययाप्रत्ययपरिभाषाणामप्यप्रवृत्तिरिति सिद्धे तासां ग्रहणं प्रपंचः अत एवास्वारः भस्कार इष्य
।त्यादिभाष्यप्रयोगेषु इकारप्रत्ययः संगच्छते अथान्य वर्णबोधकत्वाभावेन कारप्रत्ययासंभवेन तदसं
गतिः स्यादितिचेत्। सिद्धरति राज्ञेत्यादौ कनिन स्सानुबंधकत्वेप्यप्रत्ययत्वेपि लाक्षणिकत्वेपि च सुक्
(आरभ्यादौ असिप्रत्ययस्य सानुबंधकत्वेपि सुश्रोतादित्यादौ न प्रत्ययघटकोऽसौ नार्थकत्वेपि अप्रत्य

सान्ते त्यादौ मनिनघटकनो ऽ प्रत्ययत्वेपि ऽर्थन ऽ वत्वेपि लाक्षणिकत्वेपि च दण्डी त्यादौ इनेसानुबंधत्वेपि वाग्मीत्या
दौ ग्मिनि घटकत्वनो ऽनर्थकत्वेप्यप्रत्ययत्वेपि लाक्षणिकत्वेपि च सुपथार त्यादौ ऽतिप्रत्ययस्य ऽसानुबंधत्वेपि सुत्रा
मार त्यादौ नस्त्र स्य घटकत्वसो ऽनर्थकत्वेपि ऽप्रत्ययत्वेपि लाक्षणिकत्वेपि च सुशर्मेत्यादौ मनिन स्सानुबंधत्वेपि स
प्रथिमेत्यादौ इमनिच् घटकत्वमनो ऽप्रत्ययत्वेपि ऽनर्थकत्वेपि लाक्षणिकत्वेपि च ॥ उपलक्षणं न यथाव्याख्यानेन सर्वमि
दंसिद्धमिति भावः ऽअंगग्रहणादिति । ऽनर्थकद्वहणपरिभाषया ऽर्थवतएव नतएव षोध्यमः प्रत्ययाप्रत्ययस्येव षोध
मोग्रहणेनानर्थकाप्रत्ययषोध्यमोव्यावर्त्यानहृयप्यर्थसत्वमेव । ऽनर्थकस्येति । ऽप्रत्ययस्येत्यपि बोध्यं । ऽभवार
णायेति । चिंत्यमिदं । विभाषेट् इत्यत्रासंभवेनानर्थकग्रहणेपि पूर्वसूत्रेन त्संभवेन तद्ग्रहणे मानाभावात् ऽर्थवद्ग्र — भावे
हणपरिभाषायाः प्रत्ययाप्रत्ययग्रहणपरिभाषायाश्चाप्रवर्तमानाभावाच्च । तथा चांगादित्यस्येव तदनित्यत्वज्ञापक
त्वं सम्यगेवेति सुधियो विभावयंतु १६॥ ॥ एकयोगनिर्दिष्टानामिति । एकसूत्रोच्चरितानामित्यर्थः । तत्रत्ये
ति । दीधीवेव्यामिति सूत्रस्थेत्यर्थः ऽगुणरूपविकाराभावेति । तेन नरीभ्यते । दीवयोरनोवेति दीर्घो भवत्येवेत्यर्थः

वर्णव्यासरथ्यहत्वघटितत्वघटितत्वावच्छिन्ननिमित्ततायां सत्यादिति वाच्यं ऽनिमित्ततायां प्रकारत्वासामानाधि
करण्यस्यनिवेशेनादोषात् । किंतु ऽिःत्प्रत्ययनिष्ठविशेष्यतानिरूपितप्रकारतासामानाधिकरण्यस्येव नि
त्रसीरित्यादौ हलादित्वावच्छिन्ननिमित्ततायां सत्वेन ऽनृणे ऽइत्यादौ पि तादर्थ्यानुकूलनिष्ठविशेष्यतानिरूपित
प्रकारता सामानाधिकरण्यस्य च सत्वेनादोषात् । न चैवमपि ऽचित्रायांजागाचित्रे त्यादौ प्रत्ययलक्षणाप
त्तिर्वर्णत्वव्याप्यत्वघटितत्वादं त्वावच्छिन्ननिमित्ततायां ऽनिपादिवृत्तिनिष्ठविशेष्यतानिरूपितप्रकारता
सामानाधिकरण्यस्येव सत्वेन तदभावस्याभावादिति वाच्यं प्रत्ययनिष्ठविशेष्यतानिरूपितप्रकारतासा
मानाधिकरण्यस्यनिवेशेनादोषात् । न चैवमपि गवे हितं गोहितमित्यादावनरणासंगतिः ऽव्युत्पत्तिपक्षे
तस्याप्याद्विघटितं भवतीति वाक्यार्थे तत्प्रत्ययरूढः । ते तविशेष्यतानिरूपितप्रकारतासामानाधिक
रण्यस्येवाद्यावच्छिन्ननिमित्ततायां सत्वादिति वाच्यं प्रत्ययनिष्ठविशेष्यतानिरूपिताभेदसंबंधावच्छि
न्नप्रकारतासामानाधिकरण्यस्यस्यनिरूढनिमित्ततायां निवेशेनादोषादिति दिक् । एतत्सिद्धमिति ।

प्रत्ययमात्रवृत्तिर्यत्स्वावयवनिष्ठविशेष्यतानिरूपितप्रकारतासमानाधिकरणावच्छिन्ननिमित्ततायाः प्रवृत्तिनिमि
त्ततावैशिष्ट्ये कर्तव्ये प्रत्ययलक्षणं भवतीति प्रत्ययलक्षणग्रहणसामर्थ्येन प्रत्ययलोपे प्रत्ययलक्षण.
मित्यस्यार्थकरणे नैषा सिद्धा। रचोः यवायाव इति ज्ञापकस्त्री यन्निमित्ततायां प्रत्ययमात्रवृत्तित्वस्याभावात्
न प्रत्ययलक्षणेन गोहितमित्यादावयवादि। चित्रा यस्मिन्जाता चित्रेत्यादौ च अस्त्रावच्छिन्ननिमित्ततायां
प्रत्ययमात्रवृत्तित्वस्य सत्त्वेऽपि स्वावयववृत्तिदिनिष्ठविशेष्यतानिरूपितप्रकारतासामानाधिकरण्य
स्यैव सत्त्वेन तदभावस्याभावाच्च प्रत्ययलक्षणं मित्रशरीरत्वपेक्षेत्यादौ च पित्स्वार्थधातुकपदप्रयोज्यनि
मित्ततायां हलि ङ्किङितीत्येतत्पदप्रयोज्यनिमित्ततायां च प्रत्ययमात्रवृत्तित्वस्यावयवनिष्ठविशेष्यता
निरूपितप्रकारतासामानाधिकरण्यस्य च सत्त्वात् प्रत्ययलक्षणं भवत्येवेति सुधियो विभावयन्तु। विशे
ष्यतानिरूपितं चेति। उभयानुगतवर्णप्राधान्यं च स्वावयवनिष्ठप्रकारतानिरूपितविशेष्यताप्रयोजकत्वं
तथा च शालरहकूड्हस्लोः च णह इत्यादौ स्वावयवनिष्ठप्रकारतानिरूपितविशेष्यत्वप्रयोजकत्वमे

पदावृत्तेरुत्पत्तिरित्यस्य नमुरुणीयत्वानिरित्यस्य चानिरनुनासिकत्वयत्वादेरिल्लोपणचीत्येतद्विधे
यसत्त्वेन तद्दीपनादवस्थ्यमिति वाच्यं। द्विधानानुपपत्तिरिति वाच्यं स्वविशिष्टोयस्तद्व्यान्ति तनमुरुणीयत्वा
तिरिक्तो धर्मस्तद्वत्तां ग्रहणं नेत्यर्थेनादोषात्। वैशिष्ट्यं च स्वावच्छिन्नत्वस्वानिष्ठशक्तिनिरूपकतावच्छेदकस
मुदायघटकत्व(उभयसम्बन्ध)। वत्तित्वरुद्देतुभयसम्बन्धेन तथा च निरनुनासिकत्वादौ स्वावच्छिन्नत्वसत्त्वेऽपि
निष्ठायाः शास्त्रिर्यत्वादीनां समुदायघटकत्वावच्छिन्ननिरूपिताशक्तिनिरूपकतावच्छेदकीभूतः
समुदायः समुदायघटकत्वावच्छिन्नत्वस्याभावात्। अथवा स्वजन्यप्राथमिकोपस्थितिविषयावच्छिन्नं यत्त्व
ध्वानित्व तनमुरुणीयत्वो धर्मस्तद्वत्तां ग्रहणं नेत्यर्थः उपस्थितौ प्राथमिकत्वं च अणुदित्सूत्रेणाभे
दकज्ञानिपक्षे तदसहकृतं शक्तिरात्ति यहाधीनत्वमित्यस्तु नचैवमपि बहुवचने बहुल्येत्यादिता
दौ उदात्ताद्यन्यतमोच्चारणे उच्चारितस्वरान्यस्वरकस्याविधानं न स्यात् तथा च वृक्षेभ्य इत्यादौ उ
दात्तस्य सर्वेभ्य इत्यादावनुदात्तस्य चेयेभ्य इत्यादौ स्वरितस्य च विधानं न स्यात् उच्चारितस्वरा

तिरित्युस्वरस्याचरितस्य नष्ट्यापत्तेः तानिरित्युस्य तस्मुरीषीय तानिरित्युस्य स। च सत्वादिति वाच्यं
स्वरभिन्नत्वेनापि धर्मविशेषणदानेनादोषात् तथा च निरुक्तोभयसंबंधेन विशिष्टाच्चेत्यर्थे स्वजन्यप्रा
थमिकोपस्थितिविषयात् अर्वाचीनत्वमपि तनत्पुरुषीयत्व उरुत्वा अनुदात्तस्वरितत्वानिरित्युधर्म।
स्तद्ग्रहणं नेति विशिष्टपरिभाषार्थ इति दिक्। अस्याज्ञापकमिति। न च ज्ञापि लोपि ज्याद्यसंज्ञस्य ई
वृद्धियणां। न चालोन्त्यगुण इति परस्य पेज्यायानिति रूपसिद्धिरिति वाच्यं लोपेनैव सिद्धे अकारादेशवि
धानेन सवर्णदीर्घेण रूपसिद्धेः स्वांशे चारितार्थ्याभाव इति वाच्यं दीर्घोच्चारणे न विधेयत्वेन तात्पर्यवि
षयत्वस्य ह्रस्वमात्रवृत्ति अवधारणेन परिभाषाज्ञापनोत्तरं ह्रस्वोच्चारणे दीर्घविधानासंभवेन पर्वोक्त
तात्पर्यविषयत्वोपपत्तेः। दीर्घोच्चारणे न विधेयत्वेन तात्पर्यविषयत्वस्य ह्रस्वमात्रत्वे अवधारणेन
परिभाषाज्ञापनोत्तरं ह्रस्वोच्चारणे दीर्घविधानासंभवेन पर्वोक्ततात्पर्यविषयत्वोपपत्त्यर्थं दीर्घोच्चा

रणस्यैतस्य चारितार्थ्यात्। ह्रस्वविधाने पिज्यायानिति रूपसिद्धिर्भवतीति दीर्घोच्चारणे नेति पू
र्वपक्षान्तरमेतन्न सुवचं भवतु वा नो हानिः। अत्रास्य शब्दस्य शब्दाद्धागणे चेइ एव लुप्तेन ज्या
देशेन स्यात् तत्तरिद्धिः पिज्यायु इति ज्यादेशे तस्मादीयसुनि ज्यायानिति सिद्ध्यर्थं दीर्घोच्चारणस्य
सार्थक्यादित्यस्य पूर्वपक्षस्य समाधेयत्वाच्चेति दिक्। एतदेवेति। उदित्सूत्रे उदिद्ग्रहणसाम
र्थ्याद्विधेयेपि सवर्णग्रहणं भवत्येवेति स्वीकृत्यैवेत्यर्थः नव्या इति। भट्टोजीदीक्षितादय इ
त्यर्थः॥ ॥१९॥ ॥ एवमिति। भाव्यमानेन सवर्णानां ग्रहणं नेति स्वीकारे इत्यर्थः।
भाव्यमानोपीति। अत्रापि भाव्यमानत्वं। स्वविशिष्टत्वं स्वजन्यप्राथमिकोपस्थितिविषयाव
च्छिन्नत्वं विहाय स्वावच्छिन्नत्वादि पूर्वपरिभाषायामिव परिष्कर्तव्यं नपरकरणमस्यां ज्ञापकमिति
यत्तु उदित्वं उदिति तपरकरणं नास्यां ज्ञापकं सवर्णग्रहणे ध्वंसत्व तन्माध्यं नन स्य स्थाने ह्रस्वस्यै
व विधानेन तस्य स्वांशे चारितार्थ्याभावात् इत्युक्तेर्द्वितीयं ज्ञापकं उपन्यस्तमिति तन्न द्वितीयं द्वि

नि भाति यदि वा तस्यापि नदं नाप्युक्तिपि अल्लोपवल्लोपयोरुठित भस्यामिति चासिद्धत्वे दीर्घस्यापि ह्रस्वादेशार्थं
गपरत्वूरणस्य स्वांशे चरितार्थत्वात् । परत्वाद् उपधागोह इति स्वभाष्यविरुद्धेयं परिभाषा नर्थ्येह । गोह इति
विकृतनिर्देश अतः व्याख्यानाय उक्तमिदिति सन्निपातः ततः यदीयं परिभाषा स्यात् उरुपधायागुहेह्रस्वेवासिद्धे
अश्लेषस्यानुपयोगात् तद्विरोध इति नदंपिनः । उरुपधायागुहस्य अभावे नदं भाति योग्ये अचरितार्थ्य
विशिष्टं यत्न, नेचरितार्थ्यं नस्य उरुपधायागोह इति शास्त्रे सत्वेन नत्रूं वेंउत्यन्याये न गुणबाधात
स्याभांतरतस्याधुस्वविधाने यह णीति रूपासिध्या अश्लेषस्यावश्यकत्वात् । परे त्वेत परिभाषाया अभा
वेपि नक्षतिः भदसो से रित्यत्र उरिति समाहारद्वंद्वेनैव पतिः न चाप रा नेमिन त्वले नांगरंग साधुत्वे
सवर्णदीर्घ उइति रूपासिद्धिरिति वाच्यं एवं अपि तर्हि परिभाषाया अनित्यत्वेनोक्तरूपासिद्धेः अत्र
वसनात्सं सन्निक्षउरित्यादो नदोषः न च मस्तरयाति महासंज्ञाया दीर्घविधानं न स्यादिति वाच्यं एवं स
ति भाव्यमान परिभाषायाः एव नेयापर्थ्यापचेरित्याहु ॥ २० ॥ अथाधारे चापचितिरिति । न चांतरंगतापि विधी

न्यहि रंगो लुग्बाधते इतिन्यायेनात्संज्ञाल्लोपाभ्यां प्रागेव लुकि गोहित मित्यादो मस्यपलक्षणेपि नदोष इति वा
च्यं इको चीति सूत्र भाष्यप्रामाण्येन लुमति प्रतिषेध एव स्वरस्योपसंख्यानमिति वार्तिक प्रामाण्येन नह्निलुप
धेति लुक्त्विरसुहा निवङ्गवनिपधेन न च अंतरंगान पीमत्वे स्त्संज्ञालोपानिरित्वत्वेन संदेहे नादोषात् अन्यथाह
मधु सुइत्यत्र संलुप्ति संज्ञायाः प्रागेव अनेन न्यायेन लुक्कि गर्गाविदारत्यादाविते संज्ञानः प्रागेव यत्रिय लोधि
ति लुक्ति पंचैवेनः पंचेंद्र इत्यादौ इत्संज्ञा लोपाभ्यां प्रागेव लुक्क्रतेति लुकि भ इस्तादेश त्वेन स्थानिवत्त्व
प्रास्याच नदसंगतिः स्यात् न चैवमपि । नलुमतांगस्येति निषेधात् नयलक्षणाप्राप्तिः । न च लुग्रम्यनि
मित्तत्वं गणपर्यालोह रय तावत् तस्य आदेशोभावे न निषेधप्राप्तिः अत एवोत्सुतामेत्यादौ नानिषेध इति
वाच्यं आतु मानिदस्वादेशाभावप्रसंगे अत्र वहित नपूर्वत्व विभिशिष्टोपयुनक्त्यादिनस्य भयादिय
ठितं भव तीति एचो यवायावइत्यादीनामर्थेन लुमत्वम्य निमित्तत्वं गसंज्ञायाप्रसर्पात्सोहे नपावतस्य
अवादेशोसत्वेन प्रकृतेनिषेध प्रवृत्ते लुग्रत्वादित्ति भीवाच्यं लुमत्वम्य पहित पूर्वत्वेन साक्षाद
षष्ठि चालुमत्वयनिमित्तत्वं गसंज्ञाप्रसर्पीत्प्रपर्नेण साक्षात्तरंगता या वा वच्चित्वा न्यायात् ...

गानादृशोर्द्देश्यतावच्छेदकं येन भवतीति तत्तु भवतेस्तस्यार्थकरणे नानुमानिकस्थान्यादेशाभावोद्देश्यतायां
साक्षाद्धुतभवत्यपात्ययवहितपूर्वत्वावच्छिन्नत्वस्यार्थे तस्थान्यादेशाभावोद्देश्यतायां साक्षात्परंपरया
वा लुप्तभवत्यपनिरूपितांगसंज्ञावत्त्वपर्यासधर्मावच्छिन्नत्वं च विरहेण उत्सर्गमेत्यादौ च निषेधाप्रवृत्तेः
न चाजव्यवहितपूर्वत्वविशिष्टं यदंगघटितं तस्यादादिकं भवतीत्यर्थ इति तत्तु मतेनेति निषेधप्रवृत्तिर्भ
वत्येवेति तद्दोषतादवस्थ्यमिति वाच्यं गोहितुरित्यादौ अजव्यवहितपूर्वत्वस्यस्पृघटितस्य च सत्त्वेना
दादेशापत्तेर्वज्रलेपतापत्ता आनुमानिकस्थान्यादेशाभावकुस्येप्यतीत्यस्य च रत्वेवति शेषणस्याव
श्यकत्वात्तथा तानुमितयोः भूत संबंधावलंबकत्वाच्च अतएव परमत्विपुत्र रत्यादौ न भवत्यपलक्षणं
यात्रैव अन्यथा उद्देश्यतापानिर्दिश्यमान एव सत्तेन लुप्तभवत्यपनिमित्तकांगसंज्ञावत्पर्यासोद्देश्य
तावत्स्याभावेन निषेधाप्रवृत्त्या भवत्यपलक्षणं दुर्वारं स्यादिति दिक्। वर्णाश्रये इति। वर्णत्वव्याप्यधर्मा
वच्छिन्नधर्मावच्छिन्ना या निमित्तता नाराद इत्यनिमित्तिकेत्यर्थे कर्तव्ये भवत्यपलक्षणं न भवतीत्यर्थः न चाभव
णेदू मित्रश्रीरित्यादौ भवत्यपलक्षणं न स्यात् तण्ह इमित्तिस्यादेशस्य शास्त्र रहस्य हल्ङ्यादि रीत्यादेशस्य च

वेति मित्रश्रीरत्र णत्वे द्विर्वेन दोषः ॥२१॥ उणादयोव्युत्पन्नानीति। उणादयंतानदादीनि प्रातिपदिकानि यदृ
च्छया यत्वविभागज्ञानयोग्यकार्याभाववंतीत्यर्थः। एतेनेदं वाक्यं प्रमाणानां वैयर्थ्यमिति व्याहतं इदमेवे
ति। कृत्स्नग्रहणमेवेत्यर्थः अस्यारंभेति अतएव ग्रामेः एवरयंरवः रामेठः रांठं दूरत्यादौ आयनेयादि
नोदयोन अभिधानादिति भवन्नत्वेरितिशेषः व्युत्पत्तिपक्षएवेति शंरव शंढ इत्यादेःबाकुलादी
नादयो न भवंतीति भावः ॥२२॥ धातुसाधारणेति। तथा च देवत्यादौ ईदृग्दानादेः सुपोलुगादिनिश्च
न च सुपोंगस्येति न्यासेनांगावयवत्वाभावेन सुपो लुङ् न स्यादिति वाच्यं देवदत्तश्रिपीर्वस्यस्य धातुसं
ज्ञायां तस्मादिवादावंगावयवत्वस्य सत्वात् परमसर्वश्चामित्यादौ सुजनाप्त्यानथान्यासस्यकुतुम
शक्यत्वाच्च तथा हि एतन्यासकुत्स्येपरमजस् सर्वजस्र इत्यस्यानवस्थायामंगावयवत्वाभावेन सुपो
गस्येत्यस्याम्प्राविशिष्टाद्ग्रामि सुख्याप्यामः परमजस् सर्वजस्र इत्यस्यां [illegible] हि हि
तेन तस्य सर्वनामत्वाभावेन सर्वनाम्नो विहितत्वाभावेन तस्मादिति परिभाषायां जातत्वादागविहितत्व
दाद्भ्याहारस्य दुर्लभत्वाच्च सुजनाप्तिस्यत्वेव लुक्न तु सर्वनामाभिव्यंजयदंगं तस्मादामस्सुटि

त्यर्थेन वर्णाश्रमेनत्वरणानित्यादौ दोषाभावात् । विहितविशेषणस्य निरूपयोगात्सुपोंगस्येति न्यासस्तु व
चनबलात् । अत्रेदं तत्त्वं परमगावित्यादौ सुपोंगस्येति न्यासबलस्यैवोचितो णिदिति णिद्वद्भावानापत्तिर्दोषः
तथाहि हेभानो इत्यादौ णिद्वद्भावाभावाय ओतो णिदित्यत्र विहितविशेषणस्यावश्यकत्वात् । भव
नेव भरमसुगोसु इत्यस्माद्विहितत्वेन ओदंतात् विहितत्वस्याभावात् न च ओदंतादभिन्नं यदंगं यत
दादिवानस्मात्परं सर्वनामस्थानं णिद्वदिति न दोष इति नत्रापि विहितविशेषणं व्यर्थमिति वाच्यं हे
भानो इत्यादौ संबुद्धावोदंतादंगात्परत्वस्य ओदंतत्वादेः परत्वस्य वा सत्वेन णिद्वद्भावापत्त्या विहित
विशेषणस्यावश्यकत्वात् इति दिक् । तदादिनिसमादिर्यस्येति बहुव्रीहिः भस्य यद्विधानाद्व्यादौ स
र्थः प्रत्यये निष्ठाविधेयतानिरूपितोद्देश्यताश्रयनिष्ठाधर्मयदवच्छिन्नविधेयतानिरूपितयावत् तदंस्येति
प्रत्ययग्रहणे स्वविशिष्टस्य ग्रहणं भवतीत्यर्थः वैशिष्ट्यं च स्वनिष्ठचरमावयवतानिरूपित
त्व स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयधर्मावच्छिन्नविधेयतानिरूपितत्वोभयसंबंधेन यं प्रत्ययं तास

र: प्रत्यय इति। साक्षात्परंपरया वा यत्प्रत्ययं यदप्रयोज्यविषयतानिरूपिता याप्रत्ययतावच्छेदकविषय
ता तादृशविषयताश्रयोऽवयवस्तस्यार्थः तदादिर्भवतीति । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणमित्य
र्थः शब्दस्वरूपमिति तदादिरूपं शब्दरूपमित्यर्थः । विशेष्यांतरासत्व इति प्रत्ययग्रहणपरिभाषा
याः निरुक्तोभयसंबंधेन प्रत्ययविशिष्टस्य यथा ग्रहणं स्यात्तथा तदूर्ध्वमित्यर्थः तथा च विशेष्यां
तरासत्वे स्त्री अहन्यदरहन्न्यायेन तदादित्वरूपं धर्मं मात्रमुपतिष्ठते । अत एवाणोऽप्यत्वरस्या
दौ अण्णंतं यत्तदादि तदंतं यत्स्त्रीनिपदितुं इत्यर्थः । अण्णंतं अणत्ययस्माद्विहितस्तदादिस्त्वविशिष्टं
शब्दस्वरूपमित्येवार्थः अत एव च देवदत्तश्चिकीर्षतीत्यादौ देवदत्तश्चिकीर्षेत्यस्य न धातुत्वेन
न्यायेन तत्परिभाषासत्वेऽपि सनाद्यंतं यत्तदादि तदंतं धातुसंज्ञं भवतीत्यर्थे विशिष्टस्य धातुसंज्ञा
दुर्वारस्यात् । निमित्तत्वेनाश्रीयत इति अवयवांशे निमित्तांशे च तद्रूपं तद्रूपनिष्ठाया विषयता
साक्षात्परंपरया वा तादृशविषयतानिरूपिता प्रत्ययत्वावच्छिन्नविषयता तादृशविषयताश्रय
मात्र

योगत्वं नदादिविशेषणत्वं तदंतविधिप्रयोजकत्वं न भवतीति प्रत्ययग्रहणं चापं चम्याश्चेति परिभाषा
या अर्थस्य वक्ष्यमाणत्वादिति भावः॥ विशिष्टादिति न परमकगार्ग्यशब्दादित्यर्थः॥ निष्कृष्येति। पृथक्कृत्येत्यर्थः
तावन्मात्रइति यत्रं न नदादिमात्रस्येत्यर्थः अत्र चेदं भाष्यं मानमिति। न च निष्कृष्येवार्थाभावाभावेपि प्रत्ययस्योचा
रे सूत्रनाजायनः राजपोरुषिरित्याद्यापत्तिरिति वाच्यं एतद्भाष्यप्रामाण्येन प्रत्ययत्वव्याप्यधर्मावच्छिन्नोद्देश्य
तावत्प्रत्ययः निष्कृष्येवार्थाभावाभावेपि भवतीति कल्पनेनादोषात्॥ प्रत्ययमात्रग्रहणइति। न चेदेवदत्तश्चि
क्रीर्षतीत्यवतरणासंगतिः सन्नत्यप्रयोज्यविषयतायाः प्रत्यये तत्र प्रतीषिषतीत्यत्राभ्यासोत्तरखंडेपि सत्वात्
अत एव तिङंतशेखरे। अत इत्त्वेनेति दीर्घमात्रांव्याभ्यासोत्तरखंडे प्रत्ययत्वाभावेनाजंतांगाभावाद्दीर्घो न स्यादित्युक्त
मिति वाच्यं। तस्य शेखरस्यासंगतत्वेनादोषात् प्रतीषिषतीत्यत्र दीर्घवारणं तु हन्गमसाहचर्येण सन्घटकस्यैवा
चो ग्रहणाद्बोध्यं। अथवा प्रतिरूप सश्चेति स्थिते। अभ्यासविकारेषु बाध्यस्यैव पूर्वं प्रवृत्त्या प्राप्तं ह्रस्वं बाधित्वात्र
नि पूर्वविधित्वाद्दीर्घे स्थिते ह्रस्वयोश्च लक्ष्ये लक्षणन्यायेन दीर्घाप्रवृत्त्या न लक्ष्यासिद्धिर्बोध्या। परे तु प्रत्ययमात्र

ग्रहणइत्यस्य प्रत्ययमात्रवृत्तिविषयताप्रयोजक इत्यर्थः विषयतायां प्रत्ययमात्रवृत्तित्वं च प्रत्ययवृत्तित्वे सति प्रत्य
यनिष्ठोद्देश्यतानिरूपितविधेयताश्रयएतदन्यतरेतरावृत्तित्वं तथा च तिङंतशेखरः अवतरणं चेत्युभयमपि संग
तं प्रतीषिषतीत्यादावभ्यासोत्तरखंडे प्रत्ययेतरत्वस्य सत्वेपि प्रत्ययनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतरत्व
स्याभावात् न चैवमपि। सनादिपदस्यानया परिभाषया तदंत तदादिपरत्वेन तस्य अंतशब्देन बहुव्रीहौ देवदत्त
श्चिकीर्षेत्यस्य धातुत्वापत्त्या पुनरप्यवतरणमसंगतमिति वाच्यं प्रत्ययग्रहणे तदादि तदंतत्वस्य ग्रहणं यथास्या
त्तथा कर्तव्यमिति परिभाषार्थस्य पूर्वमेवोक्तत्वेनादोषात् तथा च दग्धदहनन्यायेन योर्थः अंतशब्दोपस्थितः स्तावतएवोप
स्थितिरिति सनाद्यंतादौ तदादित्वधर्ममात्रोपस्थितिरिति न दोषः अत एव महत्स्वविशेष्यान्तरासत्वे इत्युक्तं॥ अ
त एव यन्त्रिनोश्चेत्यादौ यत्रंतं यत्तदादि तदंतं यत्प्रातिपदिकमित्यादिरर्थः॥ अत एव परमगार्ग्यायणइति
एतत्परिभाषापूर्व भाष्यात् संगच्छते। शब्दस्वरूपविशेष्यमित्यस्य तदादिरूपं शब्दस्वरूपं विशेष्यमित्यर्थः
न च वनोरचेत्यादौ वन्नंतं यत्तदादितदंतं प्रातिपदिकमित्यादिरर्थो न स्यात् विशेष्यांतरासत्वादिति वाच्यं अ
नुत्तरपदस्थस्येति ज्ञापकेन क्वचिद्विशेष्यांतरसत्वेपि तदादितिधर्मिण उपस्थित्या दोषाभावात् अन्यथास

मासेन पूर्वपदस्याक्षेपात्। वैशिष्ट्यं तत्र स्वत्वेन। इस्उस्। यस्माद्विहितस्तदादि तदन्तविशिष्टं यत्र इस्उस्प्रत्ययान्तं
पूर्वपदं तस्यैव षत्वमित्यर्थेन परमसर्पिःकुण्डिकेत्यादौ षत्वाप्राप्त्या तदुपयर्थ्यं स्पष्टमेव। प्रत्ययमात्रग्रहणं तु
ञ्याङि गतश्चेत्यादौ नास्य। प्रवृत्तिरिति सर्वादिपाठे तदन्तग्रहणस्य तस्मात् ङीप् सिध्यति श्रीव भागवतेत्यादौ तु तद्
धितसमासयोर्युगपत्प्रवृत्तिः। स्वस्त्रत्र नागायनः। राजपौरुषिरित्यादौ तु न युगपद्वृत्तिद्वयमसंगः
अभिधानलक्षणाः कृत्तद्धितसमासा इत्यभियुक्तोक्त्याऽनभिधानादित्याहुः॥ ॥२४॥ एतद्वृत्त्युक्ते
ति। तथा च तदादिविशेष्यकतदन्तविधिरेवानेन निषिध्यते इति भावः। अत एव विमे न्तिङ्
अम्याः धातोश्च इत्यत्र पूर्वे बहुवचनस्य वस्त्वसोत्तिङ्न्तिङ् इत्यादौ तदादिविशेष्यकतदन्तवि
धिनिषेधेऽपि प्रातिपदिकविशेष्यकस्तदन्तविधिर्भवत्येव। न च। तिङ्न्तिङ् इत्यादौ अतिङ्
तालरस्य केवलतिङो संभवादेव तदन्तविधिर्भवतीति वाच्यं। व्यतिसे इत्यादावतिङन्तासरस्य

९

केवलतिङः संभवात्। एतेन कार्यान्तरविधानायेत्यस्य प्रत्ययानिरित्कार्यान्तरविधानायेत्यर्थः। अत एव
विमे तिङ्व्यय इत्यादौ तदादिविशेष्यकघुविशेषणकतदन्तविधिरित्यपास्तं। तदादिविशेष्यकतदन्तवि
धेरभावेऽपि प्रातिपदिकविशेष्यकघुविशेषणकतदन्तविधौ बाधकाभावात्। प्रत्ययग्रहणं चापंचम्याः
कचित्तत्सप्तम्यंतपाठोऽपि। आङिति निषेधार्थकं पदं भिन्नं तथा च साक्षात्परंपरया वा पंचम्यंतार्थनिष्ठ

निरूपित

विषयतायाः प्रत्ययमात्रवृत्तिविषयतानप्रयोजकं पदं न तु तदादिविशेष्यकतदन्तविधिप्रयोज
कं न भवतीत्यर्थः पंचम्यंतात्परमिति। साक्षात्परंपरया वा पंचम्यंतपदप्रयोज्यविषयतानिरूपि
ता प्रत्ययमात्रवृत्तिविषयता तादृशविषयताप्रयोजकमित्यर्थः तेनेति। अनया परिभाषया त
दादिविशेष्यकप्रत्ययविशेषणकः तदन्तविधिनिषेधेऽप्युपस्थितः तदादिविशेष्यकस्त्वन्यवि
शेषणकतदन्तविधौ बाधकाभावात् रेफान्तोदात्तश्चेत्यस्य तदादिस्वनः परिभ्रतायानिष्ठा तदादौ

तो नोभवतीत्यादिक्रमेण रदाभ्यामित्यस्यार्थस्वीकारेणेत्यर्थः। एतदेव मनसि निधाय वक्ष्यति।
तदाद्यंशोपस्थितविशिष्टधातु नकारस्य न नत्वमिति। स्यादेतत् रेफदकाराभ्यां परो भूतो यो निष्ठातदव
यवनकारस्य नकारादेश इत्यर्थे तीर्णवंतावित्यादावंत्यनकारस्यापि नत्वापत्तिः न च तीर्णवंतावि
त्यादौ उगिदचामिति नुमि नुम्विशिष्टस्य निर्दिश्यमानत्वाभावेन न दोष इति वाच्यं। तन्मध्यपतितन्याये
न नुम्विशिष्टस्यापि निर्दिश्यमानत्वात् न चादेः परस्येति परिभाषया न दोष इति वाच्यं एवं तर्हि तग्र
हणवैयर्थ्यापत्तेः। न च चरितं चरितमित्यादौ इटोपि नत्वापत्तिवारणाय तग्रहणं चरितार्थमिति वा
च्यं। निर्दिश्यमानपरिभाषयैव इटो दोषवारणात्। आदेः परस्येति परिभाषया तत्ककारस्य वारणे
न च तग्रहणवैयर्थ्यं स्यात् तदवस्थं स्यादिति चेन्नैवं। भ्रष्टानीः तु प्रत्यये तस्मादाचार्यवंता तूर्तेरि
ति पिदेव शब्देन समासे देवभद्रश्चेत्यादौ दकारस्य नत्ववारणाय तग्रहणसार्थक्यात्। ननु तदं

तविधिना रेफदकारात्परो भूतो यो निष्ठातदंतदाद्यवयवनकारस्य नो भवतीत्यर्थेपि निर्दिश्यमानपरिभाष
यैव धातु धातकारस्य नत्वं न भवति। न च रेफदकाराव्यवहितोत्तरत्वविशिष्टो यो निष्ठातदादिरित्यर्थेन
तुभा। तकारस्य स्यादिति वाच्यं। श्रुतानुमितपरिभाषया रदाभ्यामित्यस्य निष्ठायामेवान्वयेत्योचितत्वा
त् न चैवमपि निष्ठातः इत्यत्र षष्ठ्या अभावेन निर्दिश्यमानपरिभाषाप्रवृत्तिरिति वाच्यं। निर्दिश्यमानावयवस्या
उ पि तया परिभाषया स्थानपदार्थयोगिकसंबंधप्रतियोगित्वबोधनात्। षष्ठ्या अभावेपि षष्ठ्यर्थस्य स
त्त्वेन तत्परिभाषाप्रवृत्तेः स्वरूपपादत्वात् इति चेन्नैवं अनुदात्तोपकारादाचार्यवंता तूप्रत्यये एवकाच
इति इटि एत्निषेधे दृषत्तीर्णेत्यस्य दृषत्तरसुपलक्षणत्वेन फलसत्त्वात् न तदंतविधिरिति। न च तस्मि
न्निति परिभाषया अव्यवहितपूर्वत्वेनोपस्थित्या। रदाभ्यामिति इतः परयोरित्यर्थ एव नोक्तोति प्रकृतग्रंथासंग
तिरिति वाच्यं औपश्लेषाधिकरणबोधकसप्तम्यंतार्थोपस्थिष्टं कार्यमव्यवहितपूर्वस्य यथा स्यात्तथा
कर्तव्यमिति तस्मिन्निति परिभाषार्थस्वीकारेण। रदाभ्यामित्यव्यवहितपरयोरित्यर्थेनाऽव्यवहितपूर्वस्य

कार्यं भवतीत्यर्थस्य सिद्धत्वेन प्रकृतग्रन्थासंगतेः। अत एव तत्र तत्र परे इत्यादिभाष्यं संगच्छते। अत एव
च परनिमित्तकोऽजादेश इत्यादावर्थवत्त्वं च परस्मिन्नित्यादि संगच्छते। अन्यथा परनिमित्तकाजादेश
स्यैवाभावेन तदसंगतिः स्पष्टैव। अत एव मनोता इत्यादीनां न परनिमित्तकत्वं न च प्रत्ययस्य निमित्त
त्वेन यत्रोपादानं तत्र तदादेरिति संज्ञोपस्थितेः फलाभाव इति वाच्यं हे देवदत्त अग्रे भानो अस्य इत्या
दावपि पूर्वश्रौतो मुरसो रित्याद्य प्रत्ययेन तदाद्यंशोपस्थितेरावश्यकत्वात् वस्तुतस्त्ववश्यंशोपस्थिते
(एवावश्यकत्वात्) नित्यसाकांक्षं यद्रूपं तद्रूपनिष्ठा या विषयता साक्षात्परंपरया वा तन्निरूपिता या प्रत्य
यमात्रवृत्तिविषयता तस्यामपि सत्यां ङ्याब्विशेषणकं तदादिविशेष्यकं तदन्तविधिप्रयोजकं न भव
तीति परिभाषार्थ इत्यव्यवहितपूर्वांशोपस्थितावपि तदादिविशेष्यकं तदन्तविधिः न च हल्ङ्याब्भ्य इत्या
दौ अवश्यंशो नित्यसाकांक्षाव्यवहितोत्तरत्वविशिष्टविषयता साक्षात्परंपरया वा तन्निरूपिता या प्रत्य
यमात्रवृत्तिविषयता तत्प्रयोजकं पदं तदादिविशेष्यकं तदन्तविधिप्रयोजकं न भवतीति परिभाषा

तत्प्रयोजकं पदं

१ ङ्याप्पदप्रयोज्यप्रत्ययमात्रवृत्तिविषयतायामपि

निरूपितत्वस्य सत्त्वात्तिपदप्रयोज्यप्रत्ययमात्रवृत्तिविषयतायामपि सत्त्वात् ङ्याब्विशेषणकं तदादिवि
शेष्यकं तदन्तविधिर्न स्यादिति वाच्यं प्रत्ययग्रहणं चापंचम्या इति परिभाषायाः प्रत्यासत्त्या स्वविशेषणकस्वो
पस्थापित तदादिविशेष्यकतदन्तविधेरेव निषेधेन ङ्याबुपस्थापित तदादिविशेष्यकतदन्तविधेरभावेऽपि स्व
तसीत्युपस्थितिं प्रति तदादिविशेष्यकं ङ्याब्विशेषणकं तदन्तविधौ बाधकाभावात् अत एव बहुश्रेयसीत्यादौ कृत
रेत्यस्य ह्रस्वान्त तदादित्वेन तदव्यवहितोत्तर संबुद्ध्यवयवत्वस्य वाच्छोपस्य दुरुद्धरत्वात् न चैवं साहचर्यात्
संबुद्ध्यवयवस्य ह्रस्वोपस्थितेरिति न दोष इति वाच्यं हे कुले त्यादौ परादिवद्भावेनाम्संबुद्धित्वेन अम्रस्य सं
बुद्ध्यवयवत्वेन लोपापत्तेः नैवं साहचर्याश्रयणः प्रकृत्यवयवस्य एवं संबुद्धेरिति न दोष इति वाच्यं एवं सति हि त
दादेः इत्यस्योपस्थितेः फलाभावादिति दिक्। अत एवेति। अवश्यंशो नित्य साकांक्षं यद्रूपं तद्रूपनिष्ठा या विष
यता साक्षात्परंपरया वा तादृशविषयतानिरूपिता या विषयता तादृशविषयताप्रयोजकं पदं तदादिविशेष्य
कं तदन्तविधिप्रयोजकं नेति प्रत्ययग्रहणं चापंचम्या इति परिभाषार्थस्वीकारेण ओपश्लेषाधिकरणबोधक
सप्तम्यन्तस्य तार्थोपस्थितं कार्यं नित्यव्यवहितपूर्वसंबंधि यथा स्यात्तथा कुर्यादिति तस्मिन्निति परिभाषा

२ हल्ङ्यादिलोपसिद्धः इति दिक् यत्वेऽङ्ग ह्रस्वादित्यादौ तदादिविशेष्यकं तदन्तविधिर्भवतीत्यसंगतिः पदान्तत्वात् इति त
हेतुतदित्यादौ

र्थस्वीकारेण। स्यतासी लृलुटोरित्यादेः सुपि चेत्यादेश्च लृलुटोः परयोः यञादौ सुपि परत इत्याद्यर्थक
रणेनैवेत्यर्थः॥ एवमिति। प्रत्ययग्रहणं चापंचम्या इति परिभाषया तदादिविशेष्यकतदंतविधिनिषेधे
ऽपि उत्तरपदविशेष्यकप्रत्ययविशेषणकतदंतविधेर्बाधकाभावेन घाद्यंते उत्तरपदे परत इत्याद्य
र्थस्य घात्मत्वादिति भावः। कुमारीब्राह्मणरूपेति। न च पुंवत्कर्मधारयेति पुंवद्भावे कुमारब्राह्मणरूपेति स्यादि
ति वाच्यं कुमारी ब्राह्मणि रूपा इति स्थिते पुंवद्भावं बाधित्वा परत्वाद्ध्रस्वः स्यादिति योजनेनादोषात्। अ
थवा बहुव्रीहिसमासस्वीकारेण। वयोवाचकानां वेत्यस्य जातिवाचकत्वस्य जातेश्चेति सूत्रभाष्य
उक्तत्वेन जातेश्चेति पुंवद्भावनिषेधाच्च। यत्तु कुमार्याः ब्राह्मणरूपा कुमारिब्राह्मणरूपेति षष्ठीतत्पुरुष
इति तन्न घरूपेति सूत्रे समानाधिकरणइत्यनुवृत्तेः अत एव घसंज्ञाया नद्यां ङी तरप्रतिषेधो वक्तव्यः नद्या
स्तरा नदीतरा। न वक्तव्यः समानाधिकरणे तद्विधिरिष्यते। एवं तर्हि या नदी सेव तरेत्यादिभाष्यं संगच्छ
ते। ननु तदंतग्रहणमिति। उत्तरपदविशेष्यकप्रत्ययविशेषणकतदंतविधिर्न भवतीत्यर्थः॥ लेख

ग्रहणमिति। न च हृसरमल्लेखट्व इत्यादौ हृस्वादेशार्थं लेखग्रहणं सार्थकमिति वाच्यं। अनुपसर्जनपद
स्थस्येति ज्ञापकत्वेन क्वचिद्विशेष्यांतरसत्त्वेपि तदादित्वधर्मिण्युपस्थित्या। अणंतं यत्तदादित्वं यदुत्त
रपदं तस्मिन्परत इत्यादिक्रमेणार्थेन। अण्ग्रहणेनैव निरुक्तरूपसिद्धेः किंच यत्र प्रत्ययस्य नि
मित्तत्वेनोपादानं तत्र तदादेरित्यस्य पंचम्यंतत्वस्वीकारेण तदादेः परिभाषायाः तदंते उत्तरपदे
इत्यर्थेन हृसरमल्लेखट्वइति रूपसिद्धेश्च। किंच गिल गिलेति ज्ञापकत्वेन उत्तरपदाधिकारे सत्यप्यंतस्या
तिपदिकग्रहणेन तदंतग्रहणमिति वक्तव्यत्वेन हृसरमल्लेखट्वइति प्रयोगस्यैवाभावाच्च न चैवमपि
रात्रेः कृति इत्यादौ तदंतग्रहणं न स्यात् अनेन तदंतविधिनिषेधात् न च रात्रिशब्दस्य केवलकृत्परत्वा
संभवेन तदंतविधिः स्यादिति वाच्यं। रात्रिशब्दस्य दाचारिकेवंता तव्यदादौ केवलकृत्परत्वसंभवा
त् इति वाच्यं। प्रत्ययस्य स्वानुपूर्व्यवच्छिन्नायां प्रत्ययमात्रवृत्तिविषयतायां तदन्तविषयतायाश्च योजक
मुत्तरपदविशेष्यकतदंतविधिप्रयोजकं नेत्यर्थकरणेनादोषात्। अत एव घप्रत्ययं विहाय रूप
विषये कुमारि ब्राह्मणि रूपेत्यवतरणं संगच्छते। अन्ये तु गिलगिले च। अण्ग्रहणे न च स्वच्छस्यानु

दुर्थ्यवच्छिन्नविषयतासंयोजकत्वं ससम्बन्धेन उत्तरपदविशेष्यक तदन्तविधिप्रयोजकं तेन स्पष्टीकृतमुत्तरपदाधिकारे आनुपूर्व्यवच्छिन्नबोधक ससम्बन्धेन ग्रहणेन तदन्तग्रहणमिति परिभाषामंगीकुर्वन्ति। न चैवमपि उपसर्गस्य घञि स्यादेः तदन्तविधिर्न स्यादिति वाच्यं केवलघञ्परत्वासंभवेनैव तदन्तविधिलाभात्। न च अत्र व्याद्याचारीकृष्टिवंगाहृति अतो लोपे अड्लि अत्र केवलघञ्परत्वसंभव इति वाच्यं दीर्घस्य ह्रस्वस्य वा यणि विशेषाभावेन उपसर्गस्य घञीति सूत्रारंभसामर्थ्येनैव तदन्तविधिलाभात्। परे तु निरूढलक्षणाभ्यां सामान्यतः पदविशेष्यक तदन्तविधिर्नकल्प्यते अत एव चतुरङ्गोत्रयोरित्यादावुपपदविशेष्यको तदन्तविधिर्न। अत एव च रईस ईर्ष्य अपादोपदतरस्यादोपदादेशोन अत एव च भयशब्देन तदन्तविधिरित्यादि उपपदविशेष्यक तदन्तविधिप्रतिपादनं वार्त्तिककृतः संगच्छते इयं चानित्या तेन पदस्येति स्यधिकारे इष्टकेषीकेत्यादेः तदन्तविधिस्सिद्धावर्तदन्तविधिः कृते तत्र लक्ष्यानुसारित्वाख्यानमेव शरणमिति तु। परमकारीषगंधीपुत्र इत्यत्र तु विशेष्यांगरसत्वे तदादि तरूपधर्ममात्रस्यैवोपस्थितत्वापत्तेः। व्यङः यस्माद्विहितं तदादि तविशिष्टं यत्सर्वपदं तस्य संप्रसारणं स्यात् तत्र पन्योरुत्तरपदयोरिति व्यङस्सं

प्रसारणमिति स्वार्थेन प्रवृत्ते संप्रसारणाप्राप्त्या दृष्टान्तदानमनुचितं। न चानुत्तरपदस्थस्येति तापच्याद्विशेष्यांतरसत्वेपि कृचिद्धर्मिण उपस्थित्या व्यङं यन्तदादि तदंग्यत्सर्वपदमित्यादिक्रमेणार्थेन दृष्टान्तसंगतिरिति वाच्यं। परिभाषा स्वीकारे व्यतिकारीषगंध्यापुत्र इत्यत्र संप्रसारणस्य दुर्वारत्वादिति चेन्नैवं। हे शब्दशब्दोभिन्नक्रमः अतिकारीषगंध्यापुत्र इत्यत्रैव परमकारीषगंधीपुत्र इत्यत्रापि संप्रसारणं न स्यादिति तदर्थः मरुवदृशीनेरपुजत्वं। पितृत्वसंज्ञित इति वत्वेधर्मेण दृष्टान्तमेतत्। स्वप्रतियोगिकाभाववत्त्वसंबंधेन तत्रैवापि संप्रसारणमिति यथ संगतेः। स्त्रीप्रत्यये चानुपसर्जनेन। ननु यत्र अनुपसर्जनस्त्रीप्रत्ययः तत्र तदादिनियमप्राप्तिः लक्ष्य एव स्त्रीप्रत्ययस्यानुपसर्जनत्वात् यत्र तदादिनियमप्राप्तिः तत्र नानुपसर्जनस्त्रीप्रत्यय इति चेन्नैवं। गृह्यमाणोपस्थित इति शेषः तथा च स्त्रीप्रत्यये गृह्यमाणे अनुपसर्जन इत्युपतिष्ठते तदा तन्नियमश्च नेत्यर्थेनादोषात्। एतत्परिभाषाविषये वाक्यद्वयं। तथा चो

दि पसर्जनोयः व्यङः तदन्तं व्यङ् यस्माद्विहितं तदादि तविशिष्टं यत्सर्वपदं तदन्तस्य संप्रसारणमित्यादिक्रमेणैको वाक्यार्थः अनुपसर्जनोयः व्यङः तदन्तं यत्सर्वपदं तस्य संप्रसारणमित्यादिक्रमेणैको वा वाक्यार्थः अनुप द्वितीयो

न्ताधोदाहरणं कारीषगन्ध्येव मनुष्यः कारीषगंध्यायास्तस्याः पुत्रः कारीषगंधीपुत्र इति द्वितीयोदाहरणं परमकारीष
गंधीपुत्र इति। अतिकारीषगंध्यापुत्र इत्यत्र न संप्रसारणं पूर्वपदे ष्यङंतत्वादि तस्याभावेन पर्ववाक्यस्य ष्यङु
पसर्जनत्वेनोत्तरवाक्यस्याप्रवृत्तेः। अत्रोपसर्जनत्वं च स्वांतपर्यायप्रशक्तिनिरूपक अर्थनिष्ठविशेष्यतानिरूपि
तस्त्रीत्वनिष्ठप्रकारतावच्छेदकताप्रयोजकत्वं। स्वांतं अतिकारीषगंध्येति। तत्पर्यायायाः शक्तिः स्त्रीत्वविशि
ष्टकारीषगंध्यामतिक्रमणकर्तव्यतावच्छिन्ननिरूपितात्रशक्तिस्तादृशशक्तिनिरूपकार्थोऽतिक्रमणं तन्निष्ठ
विशेष्यतानिरूपितप्रकारता कारीषगंध्यायां तदवच्छेदकता स्त्रीत्वे तत्प्रयोजकत्वं ष्यङ इति लक्षणसमन्वयः
न च बहुश्रेयसीत्यादौ लक्षणसमन्वय ङीप उपसर्जनत्वेन ष्यङंतत्वादित्यस्य बहुश्रेयसीति समुदायेऽ
भावेन हल्ङ्यादिलोपानापत्तिरिति वाच्यं सुप्तिसिभिः सौदीरुपस्थापनीयं वाऽज्याभ्यां तदादीत्युपस्थापनी
यमित्यत्र विनिगमनाविरहेणोभाभ्यामपि तं दीपिति धर्मिणो रूपस्थित्याऽज्याप्तं तं यत्तदादि तदंयत्तदादीति
दं तद्विधिद्वयेनादोषात्। अथवा स्वांततदाद्यवधिकपूर्वत्ववत्पदपर्याप्तप्रयोजकतानिरूपितप्रयोज्यतावि
च्छिन्नविशेष्यतानिरूपिता या स्त्रीप्रत्ययनिष्ठाप्रकारतावच्छेदकताप्रयोजकत्वे सुपसर्जनत्वं एवं च बहुश्रेयसी

दा दा

त्यादावन्यपदार्थनिष्ठविशेष्यतायां बहुपदपर्याप्तप्रयोजकतानिरूपितप्रयोज्यतावत्त्वस्याभावेन ङीपो निरु
क्तमुपसर्जनत्वं नेत्यदोषः अतिकारीषगंध्यापुत्र इत्यादौ स्वांततदादि कारीषगंध्येति तदवधिकपूर्वत्ववत्स
दंतपदं तत्पर्याप्तप्रयोजकतानिरूपितप्रयोज्यतावती विशेष्यता अतिक्रमणनिष्ठविशेष्यता तादृशविशे
ष्यतानिरूपितप्रकारता कारीषगंध्यायां तदवच्छेदकत्वं स्त्रीत्वे तत्प्रयोजकत्वं ष्यङ इति लक्षणसमन्वयः

तत्रा

अस्मिन्कल्पे तत्रापि स्त्रीत्वे निरूपितत्वं कर्तव्या। वस्तुतस्तु कारीषगंध्याशब्दस्य पुत्रशब्देन समासे स्वांतपर्यायाया
शक्तिः स्त्रीत्वविशिष्टकारीषगंध्यासदृशतावच्छिन्ननिरूपितशक्तिनिरूपक सदृशार्थनिष्ठविशेष्यतानिरूपितस्त
स्त्रीत्वनिष्ठप्रकारतावच्छेदकत्वप्रयोजकत्वरूपपर्ववृत्त्या उपसर्जनत्वस्य सत्त्वेपि स्वांतंतदाद्यवधिकपूर्वत्वव
सदस्याभावेन निरुक्तोपसर्जनत्वस्याभावेनानुपसर्जनवाक्येन संप्रसारणसिद्धेः। न च वस्तुतस्तु कारीषगं

पुनः पुत्रशब्दे न समासे

ध्याशब्दस्य परमशब्देन समासे अस्मिन्कल्पे परमकारीषगंधीपुत्र इति। पर्ववृत्त्ये परमकारीषगंध्यापुत्र इति
फलभेदस्स्यादिति वाच्यं उपसर्जनत्वपरिष्कारभेदेन फलभेदस्येष्टत्वात्। विषयसप्तमीति। अनुपसर्जन
इति शेषः। लक्ष्य एवेयं परिभाषा उपतिष्ठत इति भवाह तत्र तदादिनियमो नेति व्याख्यातत्वेनेत्यर्थः तथा
२लक्षणभेदे फलभेदस्य यथा चर्चरि। लक्षणं कुमारभार्य इति भवितव्यं यथा चान्तरलक्षणं कुमारीभार्य इति जातरस्त्रीलिस्त्रभाव्य
२कारोत्यारस्य स्वसचित्तमिति न कुश्चिद्दोषः

च यस्मिंल्लक्ष्ये स्त्रीप्रत्ययोऽनुपसर्जनस्तत्र अतद्धातावपि तदादित्वमारोप्यते। तथा च परमकारीषगंधीपु
त्र इत्यादौ परमकारीषगंध्याः पुत्र इत्यर्थे तदादित्वारोपेण संप्रसारणं सिद्धं अतिकारीषगंध्यापुत्र इत्या
दौ तु ष्यङः उपसर्जनत्वेन अतद्धातौ तदादित्वारोपाभावान्न संप्रसारणं अस्मिंल्लक्ष्ये यथेष्टं पूर्वोक्तप्रयोजक
ताघटितमुपसर्जनत्वं ग्राह्यमिति दिक्। प्रत्यासत्त्या सत्येति। यस्मिन्समुदाये स्त्रीप्रत्ययांतत्वमारोपणीयं
तस्यार्थान्तरं निरूपकत्वाद्याधलक्षणं परिष्करणीयमिति। एवं। यस्मिन्समुदाये स्त्रीप्रत्ययांतत्वमारो
पणीयं तद्घटकं स्वांततद्धातवधिकपूर्वत्वनत्वसदस्यादि द्वितीयलक्षणं परिष्करणीयमिति भावः। तेनेति
प्रत्यासत्तिन्यायेन यादृशसमुदाये अतद्धातौ तदादित्वमारोपणीयं तादृशसमुदायार्थप्रत्ययनुपसर्जन
त्वस्य ग्रहणेनेत्यर्थः असंभवादिति। अस्यापत्यं स्त्री ई यानिश्रांतोनि रित्यादौ केवलस्त्रीप्रत्ययस्य
शास्त्रीयोपसर्जनत्वसंभव इति वाच्यं फलाभावात् तथा स्यात् स्त्रीभ्यो ढगिति ढगभावः फलमिति वाच्यं।
अनेन ढगभावेपि इतश्चानिञ इति ढकि विधेः फलाभावात्। परंतु अस्यां परिभाषायां लौकिकोपसर्जनत्वस
मानाधिकरणं शास्त्रीयोपसर्जनत्वं ग्राह्यं अतएव विशेषसमासाश्रयणेनैकदेशिसमासप्रकरण

प्रत्याख्यानपरं भाष्यं संगच्छते। अन्यथा अर्धकारीषगंधीपुत्र इत्यादौ ष्यङः उपसर्जनत्वादारंभपक्षे संप्रसा
रणं न प्राप्नोति। प्रत्याख्याने ष्यङः अनुपसर्जनत्वात् प्राप्नोतीति तत्संगतिः स्पष्टैव। अमतु लौकिकोपसर्जन
त्वेपि। एकविभक्तावषष्ठ्यंतवचनं। एकदेशिसमासविषयकं तन्निषेधः स्यादुपसर्जनसंज्ञानिषेधादारंभ
पक्षेपि ष्यङः तस्यानुपसर्जनत्वान्न फलभेदः नचोपसर्जनत्वपरिष्कारघटकप्रकारतायां निरूप्यनिरूपक
भावसंबंधावच्छिन्नत्वं विशेषणं देयमिति लौकिकोपसर्जनत्वस्वीकारेपि नारंभप्रत्याख्यानयोः फलभेदः अ
र्धकारीषगंधीपुत्र इत्यादौ कारीषगंध्यानिष्ठप्रकारतायां निरूप्यनिरूपकभावसंबंधावच्छिन्नत्वस्य तस्यैव स
त्त्वादिति वाच्यं। गोवष्कयणीशब्दात् स्त्रीभ्यो ढगिति ढगापत्तेः अमतु लौकिकोपसर्जनत्वसमानाधिकरण
शास्त्रीयोपसर्जनत्वस्य वष्कयण्यामभावेन न दोषः नचैतिकारीषगंध्यापुत्र इत्यादौ शास्त्रीयोपसर्जनत्वं ग्र
हीतुमेव न शक्यते इति वाच्यं स्वांतपर्याप्तिवृत्तिनिरूपकार्थनिष्ठविशेष्यतानिरूपितस्त्रीत्वावच्छिन्नप्रकारता
प्रयोजकत्वं। स्वांततद्धातवधिकपूर्वत्वस्वपदपर्याप्तप्रयोजकत्वतन्निरूपितप्रयोज्यतावद्विशेष्यतानिरूपितस्
त्रीत्वावच्छिन्नप्रकारताप्रयोजकत्वं वा लौकिकोपसर्जनत्वमिति परिष्कारेणादोषात्। शास्त्रीयोपसर्जनत्वसमा
८ कारीषगंध्यापदे लौकिकमुपसर्जनत्वं ष्यङः इति लौकिकोपसर्जनत्वस्य समानाधिकरणं शास्त्रीयोपसर्जनत्वं ८

नाधिकरणत्वेऽपि वृत्तोपसर्जनत्वस्त्रीप्रत्ययान्तादेव गोवधूयणीत्यादौ वधूयणीशब्दे तत्त्वेऽपि वृत्तोपसर्जनत्वसत्त्वेऽपि तत्स्त्री
योपसर्जनत्वस्याभावान्न ह्रस्वापत्तिः। अन्यथा निरुक्तत्रास्त्रीयोपसर्जनत्वस्य वधूयणीशब्दे सत्त्वेन ह्रस्वो दुर्वारः
स्यादित्याहुः। स्त्रीप्रत्ययमात्रग्रहणेऽपीति। अत एव समासग्रहणं नियमार्थत्वेन भाष्योक्तं संगच्छते अन्यथा परमगौरीति मा
स्यादावप्रत्यय इति पर्युदासेन समासग्रहणं विध्यर्थमेव स्यात्। अत एव राजपुत्रीमरमचारिमित्यादौ चशार्ङ्गरवादित्वा
द्वि भाषाख्यान परिप्रश्नयोरिति चस्त्रियां च शार्ङ्गरवादित्वादुङिति ङिन्निर्त्यादिर्नित्यमित्याद्युदात्तत्वं रपूपवक्रारा
रयोर्न। वाचनिक्येवेति। भाष्यवचनरूपेण पठितेत्यर्थः अत्र च तत्रापवृं यस्मात्प्रत्ययविधिरिति सूत्रे नेयङुवङिः स्यनुवर्त
मानं अस्त्रीत्येव। तथाहि यस्मात्प्रत्ययविधिरुदादीनि विभाति सूत्रे नेयङुवङिति सूत्रात् अस्त्रीति मण्डूकप्लुत्यानु

धान

वर्तते। शब्दाधिकारश्चाश्रीयते। तथा च प्रधानप्रत्ययरिति न्यायेन प्राधान्येन स्त्री तद्बोधकप्रत्ययानिरित्रप्रत्य
ये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादी सुप्तिङन्ते। तेनैषा परिभाषा सिद्धेति दिक्॥ ॥२६॥ ॥तरवन्तादे
शिति। तरबन्तत्तदाद्यादेरित्यर्थः तरबन्तं तमबन्तं च तरक्तमपोयस्मात्प्रकृति तदादि तदन्तमिति यावत्। संज्ञा
विधाविति। संज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजकत्वं प्रत्ययमात्रवृत्तिविषयताप्रयो

यदन्तत्वोपस्थापिततदादिविशेष्यकतदन्तत्वविधिप्रयो

जकत्वं न तदादिविशेष्यकतदन्तत्वविधिप्रयोजकत्वमित्यर्थः यथाप्रकृते घसंज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्य
ताप्रयोजकत्वं घप्रत्ययमात्रदन्तत्वोपस्थापिततदादिविशेष्यकतदन्तत्वविधिप्रयोजकत्वं नेति तरप्तमपोरेव घसं
ज्ञा। न च संज्ञाविधाविति निषेधप्रवृत्तिप्रयोज्यं घसंज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजकत्वं
तरप्तमपाविति पदस्य अन्यथा प्रत्ययग्रहणपरिभाषोपस्थापिततदादीतिपदस्यैव साक्षादुद्देश्यताप्रयोजक
त्वं न तु तरप्तमपाविति पदस्य। तरप्तमपाविति पदनिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोज्या संज्ञावि
धाविति निषेधप्रवृत्तिरित्यन्योन्याश्रय इति वाच्यं। संज्ञाविधाविति निषेधप्रवृत्तिसंभावनाप्रयोज्याया सं
ज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजकत्वं तत्प्रकारकसंभावनाया तत्र संभावनाविरोधी प्रत्यय
स्योपस्थापिततदादिविशेष्यकतदन्तविधिप्रयोजकत्वं नेति परिभाषार्थकरणेनादोषात्। न चैवमपि तरप्त
मपाविति पदस्य हि तद्विशिष्टतरप्तमपोर्बोधकत्वेन प्रत्ययमात्रवृत्तिविषयताप्रयोजकत्वं तेन तस्येति इदम
वतरणमसंगतमिति वाच्यं। प्रत्येकं वाक्यपरिसमाप्तिरिति परिभाषया वृद्धिसंज्ञावद्धि त्वस्योपलक्षण
त्वात् त्वावच्छिन्नतत्त्वावच्छिन्नविषयताया: प्रत्ययमात्रवृत्तित्वेन तरप्त्वादिनिष्ठविषयतायां प्रत्य

वत्त्‌द्वित्वनिष्ठविषयतायां प्रत्ययमात्रवृत्तित्वस्य विरहेऽपेक्षत्वस्याभावात्। येनविधिरिति तदन्तप्रत्ययग्रहणपरिभा
षाया अपि लक्षणायाहकत्वेन गरसमर्पितपदस्यैव तरवंतत्वमवं तत्तदादिपरत्ना या मपिध संज्ञानि स्तैवि
धेयतानिरूपितसाक्षादुद्देश्यतात्रयान्वकत्वस्याव्याहतत्वाच्च प्रत्ययग्रहणपरिभाषया तदादीतिपदमु
परस्थाप्य तद्विशेष्यत्वत्तदंतविधिरेव सर्वत्रेति न युक्तं। अणोद्व्यचः यत्रिञोश्चेत्यादौ तदंतविधिद्वय
प्रसंगात्। एवं यत्र पंचम्यंतात्परः प्रत्ययो निमित्तं चेत्। तत्राप्रत्ययस्तत्रापि पंचम्यंतस्य षष्ठ्यंतस्यवा
२। तदंततदौ लक्षणेवेति न त्वत्रापि तदीतिपदमध्याहृत्य तद्विशेषणत्वात्तदंतविधिः। वनोरचेत्यादौ तत्तु
तरपदस्थस्येति ज्ञापकाद्वन्यदस्यैव वचनं तदाधेते लक्षणेति प्रत्ययग्रहणपरिभाषाविषये च यत्त
त्परिभाषा लक्षितार्थविशेषतया त्वत्तदंतविधिर्येनविधिरिति परिभाषयानमवलीतिदिक्। अत्र साक्षा
दितिनिवेशेनार्थार्थवत्सूत्रे प्रत्ययत्वस्यत्र तदाविशेष्यत्वत्तदंतविधिः सिद्धः। अत एव त्वत्नाधितेति
सूत्रे अंतग्रहणं कर्तव्यं न कर्तव्यं अर्थवदित्यनुवर्तत्वत्नाधितांतं चार्थवदिति भाष्यं संगच्छते भाष्येऽ

र्थवदित्यनंतरं प्रातिपदिकमिति शेषो बोध्यः। वृत्तिचित्तु इयं परिभाषा न कर्तव्या तरप्तमपौ घ इत्यादौ परो तर
तमपौ इति न्यासेनैव तदंतविधिनिषेधसिद्धेः परत्वस्यावश्यं शेनिस्वसांक्षतयोपस्थितप्रातिपदिका
दित्वस्यान्वयेन प्रत्ययग्रहणं चापंचम्या इति निषेधप्रवचने स्वरूपपादत्वात्। न च तत्त्ववत्त्वनिष्ठस्य तत्तदं
तविधिस्यादिति वाच्यं। तत्पदे कोऽधिकरण इति कृत्प्रत्ययनिष्ठविषयतानयोजकत्वस्य सत्वेऽपि प्रत्ययत्व
स्यापि बोधकत्वेन प्रत्ययमात्रवृत्तिविषयतानयोजकत्वस्याभावात्। तत्कृत्तु पदे प्रत्ययवृत्तिविषयतानयोज
कस्यत्वाभावेन प्रत्ययग्रहणपरिभाषायाऽप्रवृत्तेः। न च इदूदेद्द्विवचनमित्यत्र तदंतविध्या द्विवचनांततदेसं
ज्ञा स्यादिति वाच्यं। अत्रानुमितयोः अत्र सबंधोबस्त्रीयानीति परिभाषया ईदूदेदंतस्य द्विवचनेऽन्वयेन
तदंतविधावपि। ईदूदेदंतं यद्द्विवचनं तदंतं तदादि प्रगृह्यसंज्ञं स्यात् इत्यर्थेऽपि कुमार्योरित्यत्र अगारं कुमा
र्यगारं वध्वगारमित्यादौ दोषाभावेन क्षत्यभावात्। न च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत
त्या द्विवचनांते तदाधेयत्वे इति द्विवचनेन इदूदेदित्यस्यान्वयो न स्यादिति वाच्यं। गौरी राधा तन्धा घोष इत्यत्र तदीय

दं गभीरनदी गीरेत्यत्र क्षणिकं। गभीरपदं तात्पर्यग्राहकमिति वक्तुं। ङमो ह्रस्वादचीत्यादौ ङमूपदं ह्रस्वात्परवि
तोत्तरत्वविशिष्टो यो ङम् तदंतेऽत्र क्षणिकं ह्रस्वादिति तात्पर्यग्राहकमिति वाच्यं। द्विवचनपदं ईदूदेदंतं यद्द्वि
वचनं तदंतं तदादौ क्षणिकं। ईदूदेदिति तात्पर्यग्राहकं। इत्यदोषात्। नच कृदतिङ्। तिङ्शित्सार्वधातु
कं। आर्धधातुकं शेषः॥ तिङ्॥ तिङ्शित्सि। छंदस्युभयथा। नेदङ्ज्ञाः॥ आदयस्तङ्ज्ञाः इत्यादौ तदंत

तं

विधिस्त्यादिति वाच्यं। द्वितीया श्यायेधातोरित्यधिकारेण च प्रत्ययग्रहणं चापंचम्याः इति परिभाषयैव
तदंतविधेः सिद्धेः नच एकवचनं संबुद्धिः लः परस्मैपदं॥ तिङस्त्रीणि त्रीणि। तान्येकवचन। सुपः
विभक्तिश्च + तङानावात्मनेपदं + त्यादौ तदंतविधिः स्यादिति वाच्यं ह्रस्वस्य गुण इत्यादीनां अंगाधिकारपा
ठेन याद्दशसंज्ञापुरस्कारेण अंगाधिकारे प्रत्ययनिमित्तत्वं तत्संज्ञाशास्त्रे तदादिविशेष्यकतदंतविधिर्नेति
ज्ञापनेनादोषात्। अतएव। प्रथमचरमतया। विभाषाधिकारे तीयस्य ङित्सु पसंख्यानं। कृत्तद्धित। अर्थवदधा
तुरप्रत्ययः॥ तद्धितश्चासर्वविभक्तिः॥ कन्मेजंतः॥ क्त्वातोसुन्कसुनः॥ सामंत्रितं इत्यादौ तदंतविधिः सिद्धः॥
अन्यथा निरुक्तस्थलेषु तदंतविध्युपस्थितये महत्प्रयत्नः कर्तव्यः स्यादिति गौरवं स्यात्। यत्तु पः प्रत्यय

परिभाषेन्दुशेखरटी॥

इत्यादौ प्रत्ययग्रहणपरिभाषया तदंतविधिः स्यात्। इति तन्न प्रत्ययपदस्य प्रत्ययबोधकत्वेऽपि प्रत्ययबोधक
त्वाभावेन प्रत्ययग्रहणपरिभाषाया अप्रवृत्तेरित्याहुः॥ २४॥ ननु तत्त्वाभावादिति। तदंततदादिविधित्वाभावा
दित्यर्थः एतेन नकुलस्थितशब्दस्यापि तत्प्रत्ययनिष्ठचरमावयवतानिरूपकत्वादिदमवतरणमसंगतमि
त्यपास्तं। नकुलस्थितशब्दे तत्प्रत्ययनिष्ठचरमावयवतानिरूपकत्वस्य सत्वेऽपि तत्प्रत्ययनिष्ठविधेयतानिरू
पितोद्देश्यताश्रयनिष्ठावयवतानिरूपकत्वस्याभावात्। एकग्रहण इति। एकग्रहणेनाधिकारसूत्रस्थपदस्या
पि ग्रहणं यथा स्यात्तथा कर्तव्यमित्यर्थः। अधिकारसूत्रस्थपदत्वेकदंतत्वव्याप्यधर्मावच्छिन्नतदा

मा

दित्वं तैरपीयमिति यावत्। अपि नाकस्यापि ग्रहं न चैवं संकुचितघटकत्वं कुंचितशब्दस्यापि तुणंतत
दादित्वेन कदाचित्तस्मादपि अणितुणइत्यणापत्तिरिति वाच्यं। अनया परिभाषया संकुचितस्यापि इत्यु
णंततदादित्वेन वृक्षप्रचलनन्यायेन[1] विशिष्टादेवाणित्यापत्त्यभावात्। तावन्मात्रेणेकार्थीभावाभावाच्च।
अतएव राजपुरुषः स्तनाडायन इत्यादि न संभवति। स्वरबोधमुधारण्येदिवसेषु अत्यंततनत्यस्ताः

१ वृक्षप्रचलनन्यायेन

किं तात्पर्यग्राहकत्वे सति साधुत्वज्ञानमत्र मिति स्वोच्चारणगति तच्चारी संसर्गजन्यत्वस्य निरूपकत्वं ज्ञानि
त्य सांकाङ्क्षत्वेन क्रियाविशेष

इत्यप्याह। कर्मणि ग्रहणं नेउत्तरपदइति। अतिव्याप्तिवारणार्थमिति। अभावे इति शेषः। क्वचिदभावेतिव्या
प्तिवारणायेत्यपि पाठः। ग्रहणं तत्त्वाभावादेवेति। इह पसर्गत्वे ग्रहणं तदादित्वाभावादेवेत्यर्थः। तदभावेरिति। ग
तिर्गतावित्यस्य अप्राप्तिरित्यर्थः। गत्याक्षिप्तेति। उपसर्गवत् गतित्वस्यापि जन्यबोधविषयीभूतक्रिया
विशेषविषयकबोधस्य धातुत एव जायमानत्वेन गतित्वस्य धातुसंनिधानुपपन्नं गत्या धातोराक्षेप इति भावः। तेन
एतच्च सर्वं गत्युपसर्गसंज्ञायां त्रियोगाग्रस्थेव नत्वधमिति दिक्। स्वरार्थमिति। अभ्युद्धृतमित्यत्र समा
सस्येन्तोदात्तत्वं बाधित्वा तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरप्रवृत्तौ तं बाधित्वा गतिकारकोपपदा
त् कृदिति कृदुत्तरप्रकृतिस्वरप्राप्तौ तं बाधित्वा। थ। अथ। घञ्। अच्। अप्। इत्र। क। इत्येतदन्तानामुत्त
रपदानां गतिकारकोपपदात् परेषामन्त उदात्तस्यादित्यर्थकं थाथघञ्क्ताजबित्रकाणामित्यन्तोदात्तत्वेन
तेन बाधनार्थं गतिरनन्तर इत्यत्रानन्तरग्रहणमावश्यकमिति भावः। उदउदात्तत्वसिद्धेरिति। न च विशेष्यां
तरसत्त्वे तदादित्वधर्ममात्रस्यैवोपस्थित्या गतिकारकोपपदात् सर्वं कृत् स्यादिति तदादि सविशिष्टं कृ

दन्तं उत्तरपदं प्रकृत्येति गतिकारकोपपदानामित्यर्थेनाभ्युद्धृतमित्यादौ उद्धृतस्य कृदन्तं तदादित्वाभावात् कथं उद
स्वरसिद्धिरिति वाच्यं। अनुत्तरपदस्थस्येति ज्ञापकेन क्वचिद्विशेष्यांतरसत्त्वेपि तदादित्वधर्म्युपस्थित्या कृ
दन्तं यत्तदादि तदन्तं यदुत्तरपदं तत्प्रकृत्येत्यर्थेन उदउदात्तत्वसिद्धेः। अथवा गतिरनन्तर इत्यत्र गतिरित्येतत्प
ठ्यते। च। पुनर्विध्यर्थः। इदं चापूर्वपदत्वेपि स्वरार्थमिति। उदउदात्तत्वसिद्धेश्च अनन्तरग्रहणवैयर्थ्या
र्थं व्यवधाननिवृत्त्यर्थमित्यर्थमिति। उपसर्गकर्तृककर्मत्वस्य यावधिकव्यवधानवदनभिनिवृत्त्यर्थमित्य
र्थः। तदसमभिव्याहृतस्येति। चेत्यमिदं न खनिर्भिन्न इत्यादौ समासोत्पन्ने। कृदन्तेनेति। कृदन्तनदा अ
दिनेत्यर्थः। इनुणन्त वादिति। इनुणन्तनदादिचादित्यर्थः तलोपणीति। एतद्दोषाभारं पूर्वमेवावोचाम।
पाक्षिकदोष इति। संकुचितमिति केवलकुटित्यित्युभयोरपि इनुणन्तनदादित्वाभावादिति भावः। केवलस्या
पीति। केवहृत इत्यस्यापीत्यर्थः। क्तान्तत्वेनेति। क्तान्तनदादित्वेनेत्यर्थः। कृद्विशेषग्रहणमिति। यथा द्वि
तीयाश्रितेत्यादौ श्रितादीनां गतिकारकपूर्वपदानां ग्रहणं। सामान्यग्रहण इति। कृत्करणे कृता बहुलमि

त्यादौ हलसदेन गतिकारकपूर्वस्यापि ग्रहणं। हलमात्रग्रहण इति। अनरव। जिच्चित्यादिर्नित्यमित्यत्र त्वंगसंयो
स्य इत्यादौ उपसर्गसंबंध्यकारेणैनेति दिक्। २८। ननु जरया इत्यादौ जराशब्दांतंत्यदंगं इष्टके पीकमालानामि
य र त्यादौ। ईकष्यंतत्पूर्वपदं सज्ञपोरित्यत्र सज्ज्वशब्दांतं यसदमित्याधर्थश्च कथमित्यत आह। पदांगाधिकार
इति। तदंतग्रहणमिति। विशेषणांतस्य ग्रहणं भवतीत्यर्थः तस्येति तु व्यपदेशिवद्भावलभ्यार्थबोधपंक्तिस्य
शार्थमेव। विशेष्यमिति। विशेष्यमेवेत्यर्थः असतिप्रमाणांतरे। पदाधिकारे। उत्तरपदाधिकारेच पदमंग
पूर्वपदं च विशेष्यमेवेति यावत्। प्रमाणांतरसत्वे तु क्वचिद्विशेषणत्वमप्येतेषां। यथा जस श्री। सर्वनाम्नस्मै।
उ॰ सिङस्योस्मात्स्मिनौ। पूर्वादिभ्यो नवभ्यो वा। आमि सर्वनाम्नः सुट्। पद्दस्य पदाज्ञानीत्यादौ। मासपूर्वाः
मासपूर्वाय। मासपूर्वाणां। दध्यपादो हन इत्यादौ च गिस्मायाधापत्तिवारणाय पदादेशवारणायच अंगं विशेष
णं। सर्वनाम विशेष्यं। पाद्दस्येति च विशेष्यमिति। अंगभिन्नं यदतंनं सर्वनाम पूर्वपदभिन्नं यमादपदमिस्या
दिक्रमेणार्थः। नरुक्तार्थे वर्णाश्रमेतराणां दध्यपादोपहत इति च भाष्यप्रयोगस्य सत्वात्। एतेन येनविधिरित्यत्र

तानिरूपितत्वविषयित्वसंबंधावच्छिन्नमापकत्वात्तस्य सत्वेपि स्वनिरूपितविषयित्वसंबंधावच्छिन्नव्यापकतानिरूपितवि
षयित्वसंबंधावच्छिन्नव्याप्यता

नैव तदंतविधेः सिद्धत्वेन इयं व्यर्था। अन्यथा उ तस्मिन्निति परिभाषा लभ्यार्थमादाय व्यवहितपूर्वस्य का
र्याणि भवंतीत्यादि परिभाषांतराणि भवेयुरित्यनवस्थाः स्यादित्यपास्तं। न गदंतग्रहणमिति। तेन दध्य
पादोपहत इत्यत्र पादस्य पदाज्ञानीति पदादेशो न। २३। अदंत गतिपक्षाभावादिति। वक्ष्यमाणलक्ष्यणा
अंतत्वलक्षण घटकत्वशरीरांतः पातिस्वनिष्ठविषयत्वसंबंधावच्छिन्नव्याप्यत्वाभावस्य अभावेन स्व
स्मिन् स्वघटकत्वस्याभावेन स्वस्मिन् स्वांतत्वस्याभावादिति भावः। व्यपदेशिवदेकस्मिन्। अत्रेदं तत्वं
स्वघटकाव्यवहित पूर्वत्वं स्वघटकाव्यवहितोत्तरत्वाभाववत्व स्वघटकत्व एतत्त्रितयसंबंधेन स्ववि
शिष्टत्वं आदित्वं। स्वघटकाव्यवहितोत्तरत्व स्वघटकाव्यवहितपूर्वत्वाभाववत्व स्वघटकत्व एतत्त्रितय
संबंधेन। यत्किंचित्समुदायविशिष्टत्वमंतत्वमिति सत्रकृदभिमतं। अत एवाभोधंतवदेकस्मिन्निति
सत्रयामास। तथाच स्वस्मिन् स्वघटकत्वं वर्ततएव। वृक्षत्वं स्वस्मिन् स्वादित्वं स्वांतत्वं नास्ति अत एव धु
गि। इयियायेत्यादौ अभ्यासभावद्विर्वचन संपन्नायउपायांतरं भगवता नाकमिति बोध्यं। अपूर्वात्तुत्तरत्व

क्षणत्वादाद्यंतयोरित्यस्मिन्निवदन्ताद्विकारस्तु स्वघटकत्व स्वघटकव्याप्यवर्णेनानन्तराभाववत्त्व एतदुभ
यसंबंधेन। स्वविशिष्टत्वं आदित्वं। एवं स्वघटकत्व स्वघटकपूर्वत्वाभाववत्त्व एतदुभयसंबंधेन स्वविशि
ष्टत्वमंत्यत्वमित्यभिप्रेत्याह। अत एव। आ ध्मामित्यादौ आद्यंतवदेकस्मिन्निति सूत्राभावेप्यदंतत्वनिबं
धनो दीर्घः सिध्यति। एकस्मिन्नपि स्वघटितत्व स्वघटकत्वयोः सत्त्वादिति बोध्यं। अपूर्वानुत्तरलक्षणत्वा
दाद्यंतयोरित्यस्मिन्निति वार्तिकं। आद्यंतयोरित्यस्य आदित्वांतत्वलक्षणयोरित्यर्थः। अपूर्वानुत्तरलक्षण
त्वादित्यस्य। स्वघटकत्वावधिपूर्वत्व। स्वघटकावधिकोत्तरत्वैतद्घटितानिरूढलक्षणक्षणत्वादित्यर्थः। स्व
स्मिन् अतिदेशमंतरा स्वघटकत्वस्य स्वघटितत्वस्य च मुख्यस्याभावात्। धृगित्यादि लक्षणसिध्योरा
द्यंतवदेकस्मिन्निति सूत्रस्यावश्यकत्वादतिदेशं विना स्वस्मिन् स्वघटकत्व स्वघटितत्वयोरभावादेव स्व
स्मिन् स्वादित्वादिकं नायातीत्यपूर्वानुत्तरलक्षणत्वादिति वार्तिकं च अस्याचक्षाणो भाष्यकारस्तु। स्वघ
टकत्व स्वघटकवर्णध्वंसानधिकरणक्षणवत्त्वमुत्पत्तिकत्व एतदुभयसंबंधेन स्वविशिष्टत्वमादित्वं। एवं

स्वघटकत्व स्वघटकवर्णप्रागभावानधिकरणक्षणवत्त्वमुत्पत्तिकत्व एतदुभयसंबंधेन स्वविशिष्टत्वमंतत्वं। अत्र
घटकत्वं च स्वनिष्ठविषयतासंबंधावच्छिन्नव्याप्यतानिरूपितविषयतासंबंधावच्छिन्नव्यापकतावत्त्वं। स्वनिष्ठ
विषयितासंबंधावच्छिन्नव्यापकतानिरूपितविषयितासंबंधावच्छिन्नव्याप्यतावत्त्वं। स्वनिष्ठविषयतासंबंधावच्छि
न्नव्याप्यतानिरूपितविषयतासंबंधावच्छिन्नव्याप्यतानिरूपितविषयतासंबंधावच्छिन्नव्यापकताभाववत्त्व
एतदुभयसंबंधेन तथा च स्वस्मिन् स्वघटकत्वं स्वघटितत्वं नेति व्यपदेशिवदेकस्मिन्नित्यारब्धव्यमित्यभिप्रेत्य
परिभाषार्थस्तु। एकस्मिन्नेकसंबंधिविशिष्टे व्यपदेशमुख्यव्यवहारवान् संबंधद्वयसत्त्वात्। तेन तुल्यं वर्तनस्य
र्थः। निरुक्तघटकत्व घटितत्व घटकत्वएकसंबंधविशिष्टेपि संबंधद्वयविशिष्टवत्तार्यकत्वमिति यावत् तथा
स च घटकत्व घटितत्वशरीरांतःपातिकसंबंधत्वेपि संबंधद्वयविशिष्टवत्त्वार्थं भवतीति लाभेन अनया परि
भाषया स्वस्मिन् स्वघटकत्व स्वघटितत्वमेव चातिदिश्यते नान्यो धर्म इति दिक्। निमित्तसद्भावादिति।
यादृशव्यवहारं प्रतियन्निमित्तं तस्य सत्त्वादित्यर्थः। व्यपदेशोऽस्य भावादिति। यादृशव्यवहारं प्रति य
न्निमित्तं तस्याभावादित्यर्थः। अदंतत्वादिति। स्वस्मिन् स्वघटितत्व स्वघटकत्वस्य चाभावे स्थितेऽपि त

एतदुभयसंबंधेन स्वविशिष्टत्वमेवं घटितत्वमपि

तयोरनिर्देशादित्यर्थः॥ एकस्मिन्नुरस्पृष्टेरिति। मुख्यधर्मवदघटितत्वे सति। मुख्यधर्मवघटकत्वे सति मुख्य
धर्मवदसमभिव्याहृतत्वमहायत्वं। अत्र प्रथमसत्वं तदानेन च समासन्नयनेन प्रातिपदिकत्वस्य दर्शितं तत्र
धातुत्वस्य च नातिदेशः तृतीयदलेन च। अकारे समासन्नयननिरूपित आदित्वस्य च इकारे दर्शितं निरूपि
तत्वस्य च नातिदेशः वस्तुतस्तु चिंत्यमिदं समासन्नयनेन प्रातिपदिकत्वस्य दर्शितत्वात् अविवर्णत्वधातु
त्वस्य च अतिदेशस्य दुर्वारत्वात्। णिजो च त्वारस्यच इति भाष्यासंगतेश्च। अस्मिन्मते च स्वस्मिन् स्वघटि
तत्वं च नायातीति न भाष्यासंगतिः न चैतत्परिभाषया पदत्वातिपाधधर्मस्यैवातिदेशो भवतीति न तत्र
प्रातिपदिकत्वादेरतिदेश इति वाच्यं एवमपि रामशब्दादौ न राशब्दं चानादेरतिदेशापत्तेः॥ न च यत्र वि
शेषणीभूतो धर्म अतिदेशाभिमतं तत्र सिद्धत्वाद्युक्ति न धर्मस्यैवातिदेश इति न दोष इति वाच्यं एवमपि जर
शब्दाद्याचारक्विबंतात् र रिङ्क्षिपि नपुंसकत्वे हस्वे स्थानिवद्भावमंतरा जरशब्दत्वस्य स्वतःसिद्धस्याभावे
न तस्माज्जसि जरासीत्यादौ जरादेशापत्तेः दधीत्यत्रापि त्वस्य सिद्धत्वेन तद्घटितत्वस्य व्यवहितपूर्वत्वस्याति
देशेन यणापत्तेश्च। न च व्यपवर्गधर्मस्यानेनातिदेशो न संभवतीति न दोष इति वाच्यं। एवमपि रामेणेत्यादौ
रामेत्यत्र पूर्वत्वस्य सिद्धत्वेन पूर्वपदत्वस्य अनेनातिदेशो प्रातिपदिकान्तस्येति णत्वविकल्पस्य। स्त्रोक्त

नदोषः परमकवयतीत्यादौ अंतरंगपरिभाषयावारणकृतमेव। एवं च अचिर्विंजेघ्रीयते देध्मीयतेइ
तिभाष्यमपि सुयोजमेव अकारस्य द्वित्वनिमित्तत्वापर्यास्यधिकरणप्रत्ययघटकत्वाभावेनाचीति
पदसत्वे दोषाभावात् तदसत्वे च दोषात्। गाङ्कुटादीत्यत्र द्वित्वकारको निर्देश इति लिङ्गवस्थायामे
वगाङादेश इत्यादौ न दोषः॥ एवं चेयं परिभाषा निर्मूला निष्फला च भाष्ये अदृष्टा चेत्याहुः॥ ७॥ ॥ दा
धेर्नस्यादिति। दापि दारूपत्वाभावेपि तद्घटकदाशब्दे दारूपानपायाद्घुसंज्ञाभवत्येव दारूपाभावेन घुसं
ज्ञा न स्यादिति वाच्यं एतावसर्थकं यदागमपरिभाषायाऽभावेन दाशब्देऽर्थवत्वं नास्तीति वक्तुमशक्यत्वा
दिति चेन्नैवं अर्थवत्वस्य लौकिकान्वयव्यतिरेकसाध्यत्वेन यदागमपरिभाषानपेक्षणात् अत एव
भावकर्मवाचिनि परत इत्युच्यमाने सीयुडविशेषितत्वे इति स्यसिच् सीयुट्सूत्रस्थं भाष्यं अपदां तार
तिर्विं [illegible] नचार्थवद्ग्रहणान्न दोषः एवं तर्हि भिंधुरित्यादौ पररूपं न स्यादिति। उस्यपदांता
दिति सूत्रस्थभाष्यं च संगच्छते पररूपं त्वयुरित्यादौ चरितार्थमिति तदाशयः॥ अन्यथा भिंधुरित्या

दीव घुसोर्थवत्वादिदं भाष्ये मसंगतं स्यात् आगम समभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वस्वीकारणभ्र्यादि
त्यादौ हल्ङ्यादिलोपः रामाणामित्यादावक्लोपश्च न भवतः न चैगमादाग्रहणेष्वविशेषइतिपरिभाषया लक्ष
णप्रतिपदोक्तपरिभाषानिरनुबंधकपरिभाषाअर्थवद्ग्रहणपरिभाषाणामप्रवृत्तिबोधनेनार्थवत्त्वाभावेपिघु
विषयं संज्ञाभवत्येवेतिवाच्यं उपसर्गत्वस्यभोधविषयीभूतक्रियाविशेषयत्नतात्पर्यग्राहकत्वे सति प्राधान्यतमस्व
रूपत्वेन प्रवृत्तेघुजन्यबोधाभावेन घुनिरूपितोपसर्गत्वाभावेनणत्वाप्रवृत्तेः एतेनयथोद्देशपक्षपूर्वेना
नाघुसंज्ञारदानीमपिवर्तत इतिरदमवतरणमसंगमेवेत्यपास्तं न चपरत्वं धातुरूपसर्गेणयुज्यत इतिवत्
त्वेप्रणिदारइतिदत्तायांघुसंज्ञार्थवत्तयोः सत्वात्नण्णत्वं भवत्येवेतिपुनरिदमवतरणमसंगतमितिवा
च्यं णत्वस्यासिद्धत्वेनणिजुवर्णानयोस्तयोः घुनिरूपितोपसर्गत्वाभावेनणत्वाप्रवृत्तेः एतत्सूत्रकृत्मे
वपठ्यतेऽसिद्धशास्त्रप्रवृत्तिप्रतिबंधकीभूतसापादिकशास्त्रप्रवृत्तिसंभावनायांपूर्वत्रेपादिकंन
प्रवर्ततइति नचैवमपिघुकः बहिर्भूतणिजनिमित्तकत्वेनासिद्धत्वान्तहिरूपनत्वभ्रमप्रयुक्तप्रवृत्तिः

रुक्तिं नगोचरयतीतिन्यायेनदाप्येवदाबुधाघुसंज्ञायांतन्निरूपितोपसर्गत्वसत्वेणत्वंभवत्येवेत्यवत
रणमसंगतमितिवाच्यं संज्ञासञ्ज्ञास्त्राणांविधिनिमित्तनिमित्तत्वेनतेनर्ददेशेणत्वस्यपदत्रयनि
मित्तकत्वेनघुसंज्ञायापिपदत्रयनिमित्तकत्वेनतस्यास्ववहिरंगत्वात्अतएवयःसः इत्यादिलक्ष्या
णिसिध्यंति अन्यथांतरंगायांगुणसंज्ञायांकर्तव्यायांस्यदाधत्वस्यबहिर्भूतविभक्तिनिमित्तकत्वे
नबहिरंगत्वेनासिद्धत्वादतोगुणइतिपररूपाप्राप्त्यातदसिद्धिस्स्पष्टैव नदंगीकारेचातोगुणइतिप
ररूपेऽन्तानंतर्यसत्वेनत्वानंतर्यइतिनिषेधात्रदोषः अतएवसोस्यादिरितिनस्मेहितमित्यादि
निर्देशाः संगच्छतइतिदिक् यदागमाइति यस्यआगमाः यदागमाः अवयवत्वावच्छिन्नविधेयता
श्रयत्वमागमत्वं निरूपितत्वं उद्देश्यत्वंवाषष्ठ्यर्थः आधेनिरूपितत्वसंबंधेनविधेयतायामन्वयःअं
त्येऽवयवतेऽन्वयः तथाचयदागमारत्तस्यपष्ठ्योद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयाः
यन्निरूपितावयवत्वावच्छिन्नविधेयताश्रयाइतिवार्थः इदमुत्तरवाक्येहेतुः तद्गुणीभूताइतिआरो

पितत्वं चेत्यर्थः तथाच तन्निरूपितारोपितावयवत्ववत्त्वं तदित्यर्थः। इदमपि उत्तरवाक्ये हेतुतद्ग्रहणे नेवार्थ्यं तदिति।। आगमिग्रहणेन आगमविशिष्टार्थं तदित्यर्थः आगमनिष्ठविधेयतानिरूपितोद्देश्यताश्रय पर्याप्तिधर्मा आगमविशिष्टेति निर्दिष्टं तदिति यावत् आगमवैशिष्ट्यं च स्वघटितत्व स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटितत्व स्वविशिष्टघटितत्वैतत्त्रितयसंबंधेन वैशिष्ट्यं च स्वाघटकत्व स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयाघटकत्वैतदुभयसंबंधेन। प्रथमसंबंधोपादानेनागमसभिव्यवहारकृत्स्यग्रहणं।। द्वितीयसंबंधोपादानेन केवलागमस्य न ग्रहणं तृतीयसंबंधोपादानेन अधिकस्य न ग्रहणं। द्वितीयवैशिष्ट्यघटकसंबंधयोरन्यतरानुपादाने आगमविशिष्टस्याग्रहणापत्तिरिति दिक्। यमुद्दिश्यागमो विहितइति चिंत्यमिदं अवयवत्वावच्छिन्नविधेयताश्रयस्यागमपदार्थत्वेन विधेयताश्रयस्य विहितपदार्थत्वेन चानयोर्धर्मावच्छिन्नावच्छिन्नस्य तयोर्धर्मावच्छिन्नेऽभेदान्वयबोधस्याव्युत्

पन्नतयानादृत्तप्रयोगस्य दुरुपपादत्वात् घटोनीलघट इति वत् विधेयांशेऽभावकत्वगाहिशाब्दबोधोदये न कथंचिनादृत्तप्रयोगापादाने पि विहितपदवैयर्थ्याच्च तद्ग्रहत्वेपेति ननु तद्ग्रहणं श्रोत्रमित्यत आह तद्बोधकत्वेनेति उपपादितमेतत् दारिमस्येति। अवयवावयविनोः समुदायोवयवोभवतीतिन्यायेन रेफस्य विशिष्टावयवत्वाधदवयवान्तद्ग्रहणेन ग्रहणं तत्सूत्रमाने दारिमस्य घुसंज्ञास्यादिति साना भूदित्येतदर्थं यमुद्दिश्येति वक्तव्यमित्यर्थः न चावयवावयविनोन्नायोऽस्मिन् शास्त्रे न स्वीक्रियते यमुद्दिश्येत्यपि नोच्यते तथा च प्रनिदारयतीत्यादौ नदोषइति शेरतेरत्पादेरुट्रिगुणार्थमावश्यकत्वात् न चात्मनेपदेष्विनंतः। त्यदादेशेत्तः प्रागेव प्रतिपदं विधित्वात्सर्वगुणपश्चाददादेशे लक्ष्यसिद्धान्यायस्य नोपयोग इति वाच्यं आपन्नादि ष्पदेशावद्वचनं स्वरसिध्यर्थमितिवार्तिकेनोपदेशवत्त्वे एवादेशप्रवृत्त्या रुट्गुणयोः शास्त्रयोः परत्वनित्यत्वाच्च रुट्रिगुणार्थं न्यायस्यावश्यकत्वात् एवं स्वच्छादयतीत्यादौ ह्रस्वस्य तुग्विशिष्टस्य ग्रहणं भवतीति पदत्वेतिज्ञितिउदरस्य प्रवृत्यर्थं न्यायस्यावश्यकत्वाच्च न चतस्मिन्निति प

रिभाषयोपस्थिता व्यवहितपूर्वस्येत्यनेनोद्दिष्टोपीकस्य तदन्तविधौ तस्यांगस्यैव तुगिति न दोष इति वाच्यं । देवदत्त
शिवच्छादयतीत्यादौ वक्ष्यमाणन्यायेन देवदत्तशिवेत्यस्य तुकि तुग्व्यवधानेन पदान्तत्वाभावात् स्वरता
पत्तेः ॥ ननु शेरत इत्यादौ विवक्षति दारयतीत्यादावप्यस्यावयवावयविन्यायेन नागमविशिष्टस्य समुदायग्र
हणेन ग्रहणात् घुसंज्ञा दुर्वारैवेति चेन्नैतत् केचित् अवयवावयवविधानादागवयवस्य यत्समुदायघटक
त्वं तादृशसमुदायग्रहणेन ग्रहणात् घुसंज्ञा दुर्वारैवेति) नावयवावयवविशिष्टस्य ग्रहणं भवति तथा च शे
रत इत्यादौ भवयवावयवस्य रूपविधानादागवयवस्याच्छब्दस्यानेशब्दघटकत्वमित्यनेन शब्देग्रहणेन रुड्वि
शिष्टस्य ग्रहणं भवति अतिदारयतीत्यादौ तु रप्राप्तरङ्गितत्वात्स्थाने प्रसंगावस्थायामेव रपुक् इरस्त्रस्याणो
विधानादवयवावयवरेफपुग्विधानादागवयवस्याकारस्य तदघटकत्वमिति दाशब्दत्वाद्ग्रहणे न दारित
स्य न ग्रहणमित्याहुः ॥ परे त्ववयवावयविन्यायस्यात्र ज्ञापकत्वेनानोपयोगः यदागमा इत्यत्रोद्देश्यतापुरस्सरं

स्यादिपरत्वे परं तु आगमविधानादागमविशिष्टस्यागमनिष्ठविधेयतानिरूपितोद्देश्यताश्रयस्य न समुदाय
घटकत्वं तादृशसमुदाय एवोद्देश्यता पर्याप्त्या स्वीक्रियते तथा च शेरत इत्यादौ रुड्विधानात् प्राक् रुड्विधेय
तानिरूपितोद्देश्यताश्रयाच्छब्दस्यानेशब्दस्य घटकत्वमिति पर्याप्त्यानन्तोद्देश्यतायाः सत्त्वेन यदागमन्यायेनैव
विशिष्टे सार्वधातुकत्वस्याभावात् दारयतीत्यादौ रेफपुग्विधानात् प्राक् रेफपुङ्निष्ठविधेयतानिरूपितोद्देश्यताश्रयाकारस्य नत
घटकत्वमिति तत्र पर्याप्तोद्देश्यतायाः अभावेन यदागमन्यायेन न दारित्यस्य घुत्वं अत्र च मत्कृतसत्रे स्थं
भाष्यमेव मानमित्याहुः ॥ तदेतद्व्यर्थं स्पष्टमेवेति । न च आभानरीतिस्थिते आनेमुक् इति मुग्विधानं व्या
नोङ्डितः इत्यादेशबाधनार्थं चरितार्थमिति वाच्यं । आनोङ्डितः इत्यत्र नान इति वा नानेति व्या
न्यासेनेयादेशबाधे सिद्धे मुग्विधानवैयर्थ्यात् । न चैवमपि पचमानरीतिस्थिते कण्ठोष्ठस्थानिकस्य कं
ठोष्ठस्थानिकदीर्घविधानार्थं मुग्विधानं चरितार्थमिति वाच्यं । यदागमन्यायेनाकारस्य तन्निर्कंठमात्रस्था
निकत्वस्य मकारविशिष्टे इति देशानादेशात् अन्ये तु पादयत्रिकृतसुक्विधानव्यर्थमत्रिकमु

ग्विधानमेतदनित्यत्वे ज्ञापकं न च पादमान्तेऽपि वर्णसत्त्वे प्रमाणं। नास्तीति वाच्यं व्योर्लघुप्रयत्नतरः शा
कटायनस्येति सूत्रस्यार्धविसर्गसदृशत्वविधिपरतामुपादाय पादमान्तेऽपि विसर्गविधिभाव इति शब्दर
त्नग्रंथस्य पादमान्तेऽपि वर्णविधायकत्वात्स्यायनसूत्रस्य च प्रमाणत्वादित्याहुः। वस्तुतस्तु युटः सिद्धत्व
वचनमेतस्यानित्यत्वे ज्ञापकं। अन्यथा द्विर्दीयेत्यादावनयोजादित्वमादाय यणित्त्वं हेत्यर्थं व्यर्थं स्यादेव।
ननु शास्त्रसहस्रेणापि वस्तुनोऽन्यथाभावं कर्तुं न शक्यत इति कथं शास्त्रेण तदवयवत्वं बोध्यत इत्याह आ।
नस्य चेत्स्येति अप्रवृत्तिरिति वाच्यं ननु वर्णग्रहणे रत्नस्यागमनिष्ठविधेयतानिरूपितोद्देश्यताश्रय
पर्याप्तवर्णव्याप्यधर्मघटितो धर्मो नायातीत्यर्थो वा आगमविशिष्टवर्णमात्रवृत्तिविषयताप्रयोजकपदस्य
निपाद्यतावच्छेदकधर्मो नायातीत्यर्थो वा आगमनिष्ठपर्याप्तव्याप्यो धर्मो नायातीत्यर्थो वा नत्वक्रमेण भाष्य
विरोधानाद् पचमान इत्यादिना धकारस्येति उपदिश्यमानादेतस्येत्यर्थः अत एव रीश्वमाभन इत्यादौ स्वरः
सिध्यति अदुपदेशाभाव इति अदन्तोपदिश्यमानावयवक इत्यर्थः अत्र शब्दोऽत्रावयववाची अनुदात्तेति तासि

अनुदात्तेत्त्वं ङित्त्वं अदन्तोपदिश्यमानेभ्यः परीभूतं लसार्वधातुकमनुदात्तं स्यात्। इङ् अध्ययने कुङ् अ
पनयने इमौ वर्जयित्वेत्येतदर्थकत्वात्स्यनुदात्तेत्त्वङिदुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोरिति शास्त्रेणे
त्यर्थः। उ॰ मुट सूत्रस्थभाष्यासंगतेरिति। पदान्तस्य वर्णमात्रवृत्तिविषयताप्रयोजकपदप्रतिपाद्यता
वच्छेदकत्वादिति भावः। आगमानां आगमिधर्मवैशिष्ट्यबोधनं तु चिंत्यमेव रामाणामित्यादौ सर्वेषामि
त्यादौ चाप्रवृत्तिपदान्तस्य चागमे आनयनेन तयोरनापत्तेः हे सायंतनेत्यादौ तुट् अन्यदवृत्तिपदां
तस्यानयनेन त्वापत्तेश्च ननु पदान्तभक्तस्य ग्रहणेन यदीष्यत इति भाष्यालापनं कथमिति चेत्पदान्ते
स्येति सूत्रस्य नत्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकपदान्तत्वाश्रयस्य नत्वं
भवतीत्यर्थ इति कुर्वन्नास्ते इत्यास्ते इत्यादौ नकारद्वये पदान्तस्यानयनेन तदाश्रयस्य पूर्वणकारस्यापि
णत्वनिषेध इति केचित्। परेतु पदान्तशोभानकारः तदवयवस्य णत्वं न भवतीति पदान्तस्येति सूत्रसा

थइति भाष्यं स्वयोजमित्याहुः लक्ष्यदोषमप्याह यद्वं चेत्ति नियमो न स्यादिति। मार्ष्टिवृद्धेस्त्यादावितिभावः।
परे तु आगमवृत्तिपर्याप्तत्वव्याप्यधर्मघटितधर्मेणायातीति मुग्विधानेन ज्ञाप्यते न चाडुपदेशभङ्गस्त्वङ्गृह
णेनेति भाष्यविरोधः गुणत्ववृद्धित्वयोर्व्यपदेशिवद्भावेन॥ अन्तत्वस्य पर्याप्तत्वव्याप्यत्वाघटितत्वा   दं
दिति वाच्यं अधो गित्यत्रेदानीं दादित्वाभावेप्युपदिश्यमानदादित्वं वक्तुं मद्रते पितृपदिश्यमानादन्तत्वस्य
मराब्देऽक्षतेः। अर्थाद्दादित्ववदन्तत्वाचस्यस्यत्वमुपलक्षणमिति उपदेशादिति बाधयति न च गुणो भवति
वृद्धिर्भवतीति भाष्यविरोधः गुणत्ववृद्धित्वयोर्व्यपदेशिवद्भावेन वर्णव्याप्यधर्मघटितत्वादिति वाच्यं॥
गुणवृद्धिसंज्ञयोरेफस्य सिरस्थः सन्निभितिर्वर्तत इति भाष्यज्ञापनेनादोषात् न चैवमपि गुणवृद्धी अरा
रावेति नियमानुपपत्तिरिति वाच्यं रेफविशिष्टगुणत्ववृद्धित्वयोरभावेप्यकाराकारयोरेफावयवक
स्य सत्वेन रेफावयवकस्यैरेफावयवकृ इति नियमोपपत्तेः। अथवा आनन्तर्यमेव तयोरानन्तर्यं प्रतियो

गिभन्नमानन्तर्यं चादेशविशिष्टत्वे सति स्थानिविशिष्टत्वं वैशिष्ट्यं च स्ववृत्तित्वस्वेतर्यादेशवृत्तित्व
दल्भिन्नदलीयवृत्तित्वैतत्त्रितयसंबंधेन स्वं स्थानिवैशिष्ट्यमपि स्ववृत्तित्व स्वेतर्यावस्थान्यवृत्तित्व
स्वदल्भिन्नदलीयवृत्तित्वैतत्त्रितयसंबंधेन तथा च वृन्नोत्याद्दौ आनन्तर्याभावे स्थान्यादेशयोर्निरुक्तवैशि
ष्ट्यसत्वान्न दोषः। न चाचो ञ्णितीत्यादौ ऋकारस्यारुइति नियमानुपपत्तिः कंठमात्रस्थानजन्यत्वेऽकारा
कारयोः स्थान्यादेशयोर्वैशिष्ट्यस्य सत्वेनानन्तर्याभावादिति वाच्यं अत उपधाया इत्यतो ऽत इत्यपकृष्य मा
ठरपरिवेषणन्यायेनाकारांशे रित्यस्यैवाचो वाक्यभेदेन वृद्धिविधानेनादोषात् न च तद्धर्मितावच्छे
भ प्रतियोगिताकभेदमादाय सर्वत्रैव स्वेतरादेशावृत्तित्वस्य स्वेतरस्थानिवृत्तित्वस्य च सत्वादिद
मसंभवग्रस्तमिति वाच्यं यत्किंचिदादेशतावच्छेदकरूपविशिष्टत्वे सति यत्किंचित्स्थानितावच्छेदकरू
पविशिष्टत्वमानन्तर्यमिति परिष्कारेणादोषात् सत्यन्तवैशिष्ट्यं च स्वावच्छिन्नवृत्तित्व स्वावच्छिन्नेत

गादेशोऽवृत्तित्वस्वावच्छिन्नघटितदलभिन्नदलीयवृत्तित्वैतत्त्रितयसंबंधेन एवं स्थानितावच्छेद
करूपवैशिष्ट्यमपि स्वावच्छिन्नवृत्तित्व स्वावच्छिन्नेतरयावत्स्थान्यवृत्तित्व स्वावच्छिन्नघटितद
लेतरदलीयवृत्तित्वैतत्त्रितयसंबंधेन स्थान्येतरत्वमप्यत्रोत्तर्यं तु निरुक्तत्रितयसंबंधेनादेशा
तावच्छेदकरूपवैशिष्ट्यमेव बोध्यं। अत्र चेदं भाष्यमानं अयं पक्षो रेफस्यानागमत्वपक्षे नच
मतार्ऽर्‌इत्यादौ अनुस्वारागमविशिष्टवर्णत्वस्यान्तेदेशोऽभोभगोरितियत्वापत्तिः अत्र स्वव्यपदेश
वद्भावेन वर्णव्याप्यधर्मघटितत्वादिति वाच्यं। अयोगवाहा विशेया आश्रयस्थानभागिन इति शिक्षया विह
तत्त्वभणं चेति वचनेनाकारानुस्वारयोः स्थानप्रयत्नैक्येन परिभाषायां ज्ञापकमप्याह। अत एव नेटि इत्या
दि ननु स्थानिवत्सूत्रेऽयं परिभाषागतार्था तथाहि नित्येषु शब्देषु आगमविधानान्यथानुपपत्त्या आ
गमरहितस्थाने आगमसहित आदेशो भवतीत्य[illegible] वरूपं तत्त्वमतया भिपि दापयतीत्यादौ स्थानिव

द्भावेनैव दापि दाधाद्वत्वमायास्येवेत्यत आह। अयमर्थ इति अर्थापत्तिमूलत्वेनेति। अर्थापत्तिर्द्विधा। श्रुतार्था
पत्तिर्दृष्टार्थापत्तिश्चेति। तदभावव्याप्यवत्तानिश्चयमुद्रया तदभावव्याप्यवत्तानिश्चयमुद्रया वा परस्परविरुद्ध
धर्मद्वयज्ञानमर्थापत्तेर्विषयः यथा जीवतश्चैत्रो गृहे नास्ति पीनो देवदत्तो दिवा न भुंक्ते इत्यादौ। अत्र जीवत्वस
त्ताभावौ तदभावव्याप्यवत्तानिश्चयमुद्रया विरुद्धौ पीनत्वभोजनाभावौ तदभावव्याप्यवत्तानिश्चयमुद्रया विरुद्धा
भं विति विवेकः तथा चानित्यत्वमवयवत्वं च तदभावव्याप्यवत्तानिश्चयमुद्रया विरुद्धे। प्रकृते श्रुतार्थापत्त्या
वाक्यान्तरकल्पनेति बोध्यं। साक्षाद्धात्वाद्यायीबोधितेति। शक्त्या लक्षणया वा पाणिन्युच्चरितपदजन्यबो
धविषयीभूतस्यान्यादेशाभावे स्थानिवत्सूत्रस्य चरितार्थत्वेनाऽर्थापत्तिकल्पितवाक्यस्यान्यबोधविषयीभू
तस्थान्यादेशाभावविषयत्वेन तत्र प्रवृत्तौ प्रमाणाभावादिति भावः ननु स्थानिवत्सूत्रे आदेशग्रहणसाम
र्थ्येन पाणिनिनाऽर्थविषयीभूतादेशमात्रस्य स्थानिवत्सूत्रे ग्रहणं तथा चार्थापत्तिकल्पितवाक्यजन्यबो

धविषभ्रीतादेशस्यापि पाणिनिनासर्वगोचरत्वे नमणिदापयतीत्यादौ नदोष इति चेदत्र हि विंचेत्यादि अभाष्ये
ति। स्थानिवत्त्वसूत्रबोधितेनिर्दिश्यमानत्वस्य सत्त्वेन। नयाव्यावृत्तेः कर्तुमशक्यत्वादितिभावः। स्यादेतत् तान्त
वस्थायामनीतिपक्षस्यासिद्धत्वसूत्रभाष्याख्यानायोगात्तेन समीनिष्ठइत्यादौ टेरितिलोपेन साधितइति टिलो
पवारणाय तत्सूत्रस्यावश्यकत्वेन तत्प्रत्याख्यानस्य पूर्वपक्ष्युक्तित्वेनापि वदितादेशपरत्वाभिवादेशपश्चाद
टिनदोषः नच रमायामित्यादौ यादेशाभावश्चरितार्थ्येन नतत्र्यायोनामाबाटोबाधेपुनर्याह्नस्यादितिवा
च्यं इदमोम इति ज्ञापकत्वेन तन्न्यायस्यानित्यत्वादप्रवृत्तोपरत्वादामितुनः प्रसंगन्यायेन चारितार्थ्येः नचै
वमप्यरुदितमरुदितेत्यादौ परत्वादिटि नहिशिष्टस्यनामाधादेशापत्तिरितिवाच्यं। प्रतिपदविधित्वादंतरं
गत्वाच्च नामादिपु न तदिटिच नसिद्धेरिति चेन्नैवं। व्यतिरुदंद्रव्यतिरुदर्षीयेत्यादौ परत्वात्सीयुडिटोः नहि
शिष्टस्य सेध्यदादेशायोरापत्तेर्बभविथेत्यादौ परत्वादिटि नहिशिष्टस्य थलआधादेशापत्तेश्चेति दिक्॥१॥

पूर्वसवर्णापत्तिरिति॥ संवारवत्त्वनादवत्त्वघोषवत्त्वाल्पप्राणवत्त्वनिरनुनासिकत्वरूपबाह्यप्रयत्नसाम्येन
दत्वापत्तेरितिभावः॥ चोनश्चदस्थसत्र सत्वरप्रश्लेषेण नदोष इति वाच्यं पस्पर्धिषे बभविथेत्यादाविड्
विशिष्टस्य सेथलआधादेशाभावाय परिभाषाया आवश्यकत्वेन प्रश्लेषस्यानुपयोगात् सूत्रमावर्तन इति
अयं भावः सूत्रे यतर इति दोषः यतः षष्ठीस्थानापदार्थानुयोगिकसंबधप्रतियोगिनि इत्यर्थः फलितमाह
षष्ठ्यंतस्येति। षष्ठ्या अंतामति षष्ठीलत्सरूपः। अंतशब्दः समीपवाची तथाच षष्ठीप्रकृतिरित्यर्थः। ननु
षष्ठीप्रकृति सूत्रोच्चरितानतत्र स्थानपदार्थानुयोगिकसंबधप्रतियोगित्वसंभव इत्यत आह षष्ठीप्रक
तिसजातीयमिति। साजात्यंच स्ववृत्तिश्रावणत्वसाक्षाद्विषयतावच्छेदकधर्मेण। ननु यस्यवयोजसी
त्यादौ स्थानपदार्थानुयोगिकसंबंधप्रतियोगित्वं। भपर्यंतस्य। नयुष्मदोस्मदोरिति अतियूयमित्यादौ
र।पस्य — अतियुष्मत्स्थाने यूयाधादेशापत्तिरत आह निर्दिश्यमानावयवरूपमेवेति वाशब्दप्रयोजनं चिंत्यं षष्ठी
प्रकृतिसजातीयावयवः स्थानपदार्थानुयोगिकसंबधप्रतियोगी भवतीत्यर्थेनैव सुस्मिन् अपिव्यपदेश

वद्भावेन षष्ठीप्रकृतिसजातीयत्वसत्त्वेन सर्वसामंजस्यात् न च षष्ठीप्रकृतिसजातीयत्वं यदि निर्दिश्य
मानत्वं तदा भानिस इत्यादौ उपसर्गनकारस्य सत्त्वं भवितोत्पादौ विशिष्टस्य अज्ञादेशापत्तिश्च लक्ष्यस्थेषु
स्ववृत्तित्वावगमस्य स्वविषयतावच्छेदकधर्मस्याभावेन षष्ठीप्रकृतिसजातीयत्वाभावादिति वाच्यं ष
ष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयत्वं निर्दिश्यमानत्वमानत्वमिति स्वीकारेणोक्तदोषात्। उपस्थि
तौ प्राथमिकत्वं च शास्त्रान्तरासहकृतशक्तिग्रहाधीनत्वं। न च स्य आविष्यादौ अण्देनाणुदित्सूत्र
सहकारेणैव दीर्घादीनामुपस्थितिरिति निरुक्तप्राथमिकोपस्थितिविषयत्वरूपनिर्दिश्यमानत्वाभावा
न्मानिभवानीसादौ दीर्घत्वानापत्तिरिति चेत् अत्राहुः नन्विति। जातिपक्षे दोषाभावादिति। अस्मिन्पक्षे ग्रह
णस्य मत्त्वाख्यानत्वेन शास्त्रान्तरासहकृतशक्तिग्रहाधीनोपस्थितिविषयत्वरूपनिर्दिश्यमानत्वस्य
दीर्घेष्वसत्त्वादिति भावः। नभ्रसुधियोरिति निषेधेनेति। अणुदित्सूत्रमिति रीत्या शास्त्रान्तरासहकृ
तशक्तिग्रहाधीनत्वं उपस्थितौ प्राथमिकत्वमिति परिष्कारेण दोषात् इति भावः। न चैवमीयणचीत्य

॥निर्दिश्य॥

णो निषेधेन तच्चारितार्थ्यं। निर्दिश्यमानपरिभाषया तेनापि यणो प्राप्तेः न च निर्दिश्यमाना निर्दिश्यमा
नयोर्यत्र कार्यं भवति तत्रैवैतत्परिभाषाप्रवृत्तेरिति प्रकृते नास्याः प्रवृत्तिरिति वाच्यं षष्ठीप्रकृतिजन्य
प्राथमिकोपस्थितिविषयत्वरूपनिर्दिश्यमानस्य मानत्वस्य ग्रहणकशास्त्रबाधितत्वभावेन निर्दिश्य
मानानिर्दिश्यमानोभयकार्यप्रापकत्वस्य तत्रापि सत्त्वात् केचित्तु इयणचीत्यनंतरमेव निषेधकर्त
व्ये एतत्सूत्रकरणेन तत्करणेनोक्तार्थज्ञापनसंभवात्। अन्ये तु नभ्रसुधियोरिति निषेधयतीति नभ्रसु
धियोरिति निषेधः। वर्षाभ्वश्चेति। प्रतिप्रसवशास्त्रत्वेन नभ्रसुधियोरिति सूत्रशास्त्रनिषेधकत्वं वर्षाभ्व
श्चेत्यस्य स्पष्टमेव न च वर्षाभूशब्दस्य दाचारक्विबन्तात् क्विपि नपुंसकत्वे ह्रस्वे पुंवं च कृते वर्षाभ्वश्चेति चरि
तार्थमिति वाच्यं तेन पुंवद्भुपाशिदेशेन दीर्घात् न च बुभ्याभोः सुपीति यणोऽप्राप्तेरित्याहुः केचित्तु नभ्र
सुधियोरिति इयङ्घटितोच्चारणेन निरुक्तार्थोत्पादने न च सुभी शब्दाच्चाचारक्विबन्तात् तत्रिग्विपि नपुं
नः सकृत्स्वे तत्स्यैवानुकरणमिति न निर्देशासंगतिः। न चेवमोचीति नुमापत्त्या निर्देशासंगतिरितिवा

च्यं। पुंवद्भावेनादोषादिति चेन्न एवं पुंवद्भावे नदीघ्रान्तरूपानिर्देशेनेयङुवङ्प्रसक्त्या निर्देशासंगतिरित्याहुः
अंत्यादेशत्वादिति। चिंत्यमिदं। इयं चावयवषष्ठी विषयेऽपि वक्ष्यमाणत्वेन वर्णो वर्णतायेश्रूधातुभ्रु
वस्तु दंतं यदंगं तदवयवो यो निर्दिश्यमानस्तदवयवो यो निर्दिश्यमानो न यो रियङुवङावित्यर्थे नङि तत्र
योजनस्य ङुरुपपादत्वात् भाष्येणाविरोधादिति। यत्तु वर्णग्रहणेऽस्य स्यात् ग्रहण इत्यर्थः तथाच्य
योगवाहानां वर्णत्वेऽपि अस्त्वाभावेन न भाष्यविरोधः। अत एव एरु रित्यादौ वानुमानिकस्थान्या
देशभाववत्त्वे इवर्णस्य स्थानेनोवर्णादेश इति तन्न। इदो यू पुंसि इत्यादौ वर्णग्रहणाभावेनानु
मानिकस्थान्यादेशभाववत्त्वे इदः स्थाने निर्दिश्यमानपरिभाषया यु घटितादेशापत्तेः अर्थवत्त्वे
न स्थान्यादेशभावविश्रान्ति रिति शब्दतोऽर्थतश्चांतर्यवानादेशो भवतीति समाधानस्यैरुरित्यादाव
पि तुल्यत्वाच्चेति दिक्। ननु देवी ध्यं च गीतिदेव धूङि त्यादौ अधादेशानापत्तिः। उक्तं तेनि रुक्तनिर्दि

श्यमानत्वाभावात् न च उक्तयुक्तेनिरुक्तनिरुक्तनिर्दिश्यमानत्वं नैवास्तीति वाच्यं महदाद्यैलिंगविशिष्टपरिभाषाऽनित्या
महतीशिवायस्यै महतीप्रियेति भाष्यस्यैव प्रमाणत्वात् एवं निर्जरसा विमाश्चैन्न रसादेशानापत्तिः स्थानिवत्त्वेन तत्
द्व्याकारेणैव जराशब्देन गृहीतस्यापस्थितेर्न चेष्टापत्तिः स्त्रीन स्यस्थानिवत्वमिति षेधो वक्तव्यः न वक्तव्यः स
हृद्गतौ चिमितिषेधे यद्बाधितं तन्न बाधितमेवेति भाष्यविरोधात् एवं भवि॰तत्सादौ विशिष्टस्यजाधादेशापत्तिः
प्रथमपदेन तिङः स्त्रीणि त्रीणीति सहकारेणैव निष्पन्नसंज्ञीनामुपस्थितेर्न चेष्टापत्तिः उट्टिवित्युदाहरणं वृ
णिताश्चोरणितास्वइति दीधीवेवीटामिति सूत्रस्थ भाष्यविरोधादित्यादिदूषणगणपातः न च प्राथमिकत्व
परिष्कारघटकत्वात्तस्यां तरेत्तन्तच्छास्त्रभिन्नत्वेन संकोचान्न दोष इति वाच्यं। अतिगौरवादिति चेदाहानय
त्यादि तथाच येन विधिर्यदागमाद्यैन तच्छास्त्रद्वयासत्त्वे तच्छास्त्रद्वयाधीनत्वमेवोपस्थितौ प्रथमत्वमि
ति भावः अन्ये तु यत्सदघटितशास्त्रासत्त्वे तच्छास्त्रयदाधीनत्वमुपस्थितौ प्राथमिकत्वमित्याहुः स्यादे
तत् जरायां जरा जराज रा तस्मात्कौ। दौ विभक्तौ पूर्वत्र राप्नवदेऽपि निरुक्तनिर्दिश्यमानत्वस्य सत्त्वाज्जरसा

देशापत्तिः नचार्थिविभक्त्यर्थस्य निर्दिश्यमाने विशेषणान्वयदोषः इति वाच्यं भंगस्येप्रत्ययांशोपस्थिता
र्थं तस्य तत्रैवान्वयस्यौचित्यादिति वक्ष्यमाणत्वेन निर्दिश्यमाने विशेषणासंभवात्। एवं व्याप्तस्येवप
दावस्य व्याप्तपात् पादयतेः क्विपि पात् व्याप्तपादः पात् व्याप्तपात् तस्मात् ङसि व्याप्तपात्सदः इत्यादौ पूर्व
पादस्य निर्दिश्यमानत्वेन पदादेशापत्तिः नच भसंज्ञाक्षिप्तप्रत्ययस्य निर्दिश्यमाने विशेषणान्वयदोष।
इति वाच्यं आक्षेपप्रमाणाभावात् आक्षिप्तस्य शाब्देन्वयात् येन यदाक्षिप्तं तस्य तत्रैवान्वयस्यौचित
त्वाच्च भसंज्ञत्व एव तस्यान्वयस्यौचित्याच्च एवं स्वात्वाकुल इत्यादौ त्वायास्त्वबापत्तिः समासघट
कनिर्दिश्यमानत्वायाः सत्वात् न च त्वांतीयः समास इत्यर्थकरणेन नदोष इति वाच्यं स्वात्वाकुल
कीकरस्येत्यादौ ८ पूर्वत्वायाः स्या वाईवीरत्वादिति चेन्मैवं षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयता
श्रय समभिव्याहृतवर्णाघटितत्वे सति षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयत्वं निर्दिश्यमान
निर्दि॰ त्वमिति परिष्कारेण पूर्वतरापाते त्वास्य षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयत्वाभावात्। तथा

हि नीलो घट इत्यादौ विशेष्यतया घटेन संबंधान्नीलत्वावच्छिन्नविषयता नीलपदादेर्न तिष्ठति यथा वा नीलेन
विशेषणेन संबंधात् घटत्वावच्छिन्नविषयता नीले घटे न तिष्ठति तथा जराशब्दांतं यदंगं पाद्धब्दांतं यदंगं भ
क्तं तायः समास इति शाब्दबोधीयजराशब्दत्वावच्छिन्नपाद्धब्दत्वावच्छिन्नत्वात्त्वावच्छिन्नविषयतानां त
न विशेष्येण संबंधाद् चरमावयवजराशब्दपाद्धब्द त्वा प्रत्ययेषु न तिष्ठतीति न तेषां निर्दिश्यमानत्वं यदा
गमा इति योन्गविधिरिति बोधितेच निर्दिश्यमानत्ववारणाय सत्यंतं अन्यथा जराशब्दांतत्वावच्छिन्नविषय
तायाः परभजराशब्दे स्थाविशिष्टत्वावच्छिन्नविषयतायाश्चागमविशिष्टे सत्वेन विशिष्टस्य निरुक्तनि
र्दिश्यमानत्वं स्यात्। तदुक्तौ तु षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयजरास्था समभिव्याहृतवर्णघटि
तत्वादंगस्यागमविशिष्टयोर्निर्दिश्यमानत्वं न च देवी मंच गौरि देवधृ इत्यादावस्यादेशापत्तिः षष्ठीप्रकृ
तिजन्यविषयताश्रयसमभिव्याहृतस्त्रीप्रत्ययघटितत्वादिति वाच्यं। षष्ठीप्रकृतिजन्यशाब्दबोधीयविषया॥

अथ समभिव्याहृतस्त्रीप्रत्ययघटितत्वादिति वाच्यं षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयसमभिव्या
हृतवर्णे स्त्रीप्रत्ययघटकत्वमिति तत्त्वेन विशेषणेनादोषात् न चैवमपि अपि बदित्यादौ तावत्स्थायामुक्ति
पक्षे ॰ पादस्य स्यपि बादेशानापत्तिः अग्नि समभिव्यवहारे आगमविशिष्टस्यैवार्थवत्त्वेनार्थवत्त्वात्तस्य
पाशब्दे ऽभावेन षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयत्वाभावादिति वाच्यं येन विधिरिति परि
भाषावत् यदागमपरिभाषापि लक्षणाग्रहकेति स्वीकारेण दोषात् तथाहि पाद्विपदं पादि विशिष्टल
क्षणिकं वैशिष्ट्यं च स्वघटितत्व स्वविशिष्टघटितत्वेतदुभयसंबंधेन अत्र वैशिष्ट्यं स्वघटकत्व स्व
निष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रया ऽघटकत्वेतदुभयसंबंधेन तथा च प्रकृते स्वघ
टितत्व स्वविशिष्टघटितत्वोभयसंबंधावच्छिन्नप्रकारतास्वविषयतायाः आगमरहितपाशब्दे सत्त्वा
न दोषः एवं यदागमपरिभाषाविषये सर्वत्र निरुक्तोभयसंबंधेन स्वविशिष्टे लक्षणांगीकर्तव्या। स्वा

देशात्। व्याघ्रपाच्छब्दान्यं तान्तवत्तरिक्विपि वेनचित् तस्य समासे पुनर्निर्दिष्टिक्विपि व्याघ्रइतिभाजेनस्याच्छसि
पाच्छब्दांतत्वावच्छिन्नशाब्दबोधीयविषयतायाः पादः पदिति शास्त्रजन्यशाब्दबोधीयविषयताश्रयसम
भिव्याहृतवर्णाघटितत्वस्य च सत्त्वेन निरुक्तनिर्दिश्यमानत्वस्य सत्त्वात्सदादेशापत्तिः एवं जराद्रसपद
द्वित्वे जराजराइतिभाजेनस्य सुबंतत्वाद शब्देन समासे तस्मादौ विभक्तौ विशिष्टस्य षष्ठीप्रकृतिजन्य
शाब्दबोधीयविषयताश्रयो तत्र जराशब्दसमभिव्याहृतपूर्वजरापदत्ववर्णघटितत्वेन निरुक्तनिर्दि
श्यमानत्वाभावाज्जरसानापत्तिः। अंत्यजराशब्दे निर्दिश्यमानत्वस्य सत्त्वाज्जरसापत्तिश्चेति चेन्मै
वं। षष्ठीप्रकृतिविशिष्टप्रकारताश्रयत्वं निर्दिश्यमानत्वमिति स्वीकारेणादोषात्। वैशिष्ट्यं च स्वप
र्याप्तप्रयोजकतानिरूपितप्रयोज्यतावत्त्व स्वपर्याप्तप्रयोजकतानिरूपितप्रयोज्यतावद्विषयता
निरूपितत्व स्वजन्यशाब्दबोधीयत्वैतत्त्रितयसंबंधेन सुपदः निर्जरसावित्यादौ अंतत्वनिरुक्तवि
शेष्यतानिरूपितजराशब्दत्वावच्छिन्नप्रकारता च निरुक्तत्रितयसंबंधेन षष्ठीप्रकृतिविशिष्टा

भवतीति न कुत्रापि दोषः। तथा हि परमजराशब्दे जराशब्दत्वावच्छिन्नप्रकारतायाः सत्वेपि षष्ठीप्रकृ
तिजरापादेन समर्थासम्प्रयोजकत्वान्निरूपितप्रयोज्यतावाद्विशेष्यतानिरूपितत्वाभावात्। सा षष्ठीप्रकृ
तिविशिष्टानभिविनिती। विशिष्टस्य न निर्दिश्यमानत्वं प्रवीन्पदहिद त्वस्थले च स्थानिवद्भावेन जरा
शब्दस्यैवादेशान्निरूक्तप्रिय संबंधेन षष्ठीप्रकृतिविशिष्टाप्रकारतात्वास्तीति विशिष्टस्य निर्दिश्य
मानत्वं स्वर्वीन्न्याश्रपद इत्यादौ तु स्थानिवद्भावेन पाच्छब्दांतत्स्यैवादेशान्तदवच्छिन्नप्रकारतान
षष्ठीप्रकृतिविशिष्टेति तत्रापि न दोषः स्वजन्यशाब्दबोधीयत्वसंबंधनिवेशाज्जरारस्ज। सोस्मा वा
वृन्दवृः स्मावावृन्दवीरुत्से इत्यादौ पूर्वजराज्ञादौ न निर्दिश्यमानत्वं वस्तुतस्तु षष्ठीप्रकृतिजन्यप्रा
थमिकोपस्थितिविषयत्वमेव निर्दिश्यमानत्वं न च जराजरसावित्यादौ पूर्वजराशब्दस्य जरसापत्ति
रिति वाच्यं अचिविभक्तौ विरस्य निर्दिश्यमानविशेषणेनादोषात्। न चांगाशेभस्य स्योशिना
वृक्षस्य एवेत्यादि वक्ष्यमाणग्रथविरोध इति वाच्यं सत्यंथो संगतरति वक्ष्यमाणत्वात्। अन्यथा पंचम्यो

निर्दिश्य·

पस्थापितत्वाव्यवहितोत्तरत्वस्य निर्दिश्यमाने विशेषणाभावादुदस्थादित्यादौ पूर्वसवर्णो दुर्वारः स्यात्। तस्मा
दिति तस्मिन्निति परिभाषापस्थाप्ययोरव्यवहितोत्तरत्वस्य निर्दिश्यमाने विशेषणाभावादुदस्थादित्या
दौ पूर्वसवर्णो दुर्वारः स्यात् तस्मादिति तस्मिन्निति परिभाषोप्ययोरव्यवहितोत्तरत्वाव्यवहितपूर्वत्वयोः स
र्वत्र निर्दिश्यमान एव विशेषणाच्च न च व्याघ्रपात्सद इत्यादौ पूर्वपाच्छब्दस्य पदादेशापत्तिरिति वाच्यं कार्य
कालपक्षे यचिभमित्यस्योपस्थित्या यचीत्यस्यावृत्या निर्दिश्यमानत्वविशेषणस्वीकारेणादोषात् स्पष्टं चे
दमहल्लोपोन इति सूत्रभाष्ये। न चाकडारीयभपदसंज्ञाविषये यथोद्देशपक्ष एवास्तु तत्रेन यचिभमित्यस्य
तत्रोपस्थितिरेव न भवतीति वाच्यं। अष्टाध्यायीपाठकृतपूर्वत्वपरत्वस्यैव सर्वत्राव्यवस्थापकत्वेन कार्य
कालपक्षस्वीकारेपि दोषाभावात्। त्रिपादीविषये आकडारीयसंज्ञानां कार्यकालानंगीकारेपि सापादि
कविधिविषये कुत्रचित्तदंगीकारेक्षत्यभावाच्च। न च स्मात्तावृल्लवृद्धित्यादौ ल्यबापत्तिरिति वाच्यं त्वांतो
पसमास इत्यर्थेनादोषात्। न चैवमपि स्मात्तावृल्लवीरुत्स्ये इत्यादौ दोष इति वाच्यं। मयूरव्यंसकादयश्चे

स्यत्रस्यचप्रकारेणैषां समानतद्घटकतया प्रवेशोनेति भाष्येउक्तत्वेन निरुक्तप्रयोगस्यैवाभावादित्यादिदिक्। स्वस्व
निमित्त संनिधापितानामिति। स्वस्य परिभाषाशास्त्रस्य निमित्तेन लिंगेन परिभाषाशास्त्रीयोद्देश्यताव
च्छेदकधर्मप्रकारकज्ञानेन संनिधापितानां विधिशास्त्रसंनिधिं प्रापितानामित्यर्थः समावेशादिति। परि
भाषाविधेयानां यथायोग्यमन्वयइत्यर्थः। न बाध्यबाधभाव इति विरोधेहि बलीयसा दुर्बलं बाध्यत इ
ति न्यायेन विरोध एव बाधस्य न्याय्यत्वादिति भावः। एतयोरिति निर्दिश्यमानपरिभाषाया अलोंत्यस्ये
च अनेकाल्शित्सर्वस्यादेः परस्येत्यन्यतमस्य चेत्यर्थः अंगांगीभाव इति। शेषशेषिभाव इत्यर्थः
यथा परिभाषाविधिसूत्रयोः शेषशेषिभावः तथानयोर्नेति यावत्। उभयोरिति। निर्दिश्यमानपरिभा
षायाः निरुक्तपरिभाषाधन्यतमस्य चेत्यर्थः तद्योगादिति परस्परं स्वीयोद्देश्यतावच्छेदकज्ञानच
स्याभावेन गुणानां च परार्थत्वादसंबंधः समत्वादिति न्यायादिति भावः। तद्बाधकत्वमिति निर्दिश्यमान

निर्दिश्य॰

परिभाषाबाधकत्वमित्यर्थः॥ उदस्थादिति लक्ष्ये इति शेषः सूत्रविषय इति। उदस्थास्तंभोरिति सूत्रवि
षय इत्यर्थः। एतयोरिति। आदेः परस्याढोंत्यस्येत्यनयोरित्यर्थः। इयमिति। निर्दिश्यमानपरिभाषयेत्य
र्थः। एतयोरित्यस्य पूर्ववदर्थः निर्विषयत्वप्रसंगादिति निर्दिश्यमानपरिभाषाशास्त्रीयोद्देश्यतावच्छे
दकज्ञानं स्यादेः परस्याढोंत्यस्येत्युद्देश्यतावच्छेदकज्ञानस्य च शास्त्रस्यासंभवादित्यर्थः अकृतवि
षये नायं न्याय इति॥ स्थानिवत्सूत्र बाधितेपि निर्दिश्यमानत्वं तन्मध्यपतितन्यायबाधितेपि निर्दिश्यमा
नत्वस्य सत्त्वात्। अयं न्यायो व्यावर्तकत्वेन भवतीत्यर्थः। ननु बिंधिर्वा स्यत्रांतरंगत्वादवृद्धिविधिर्न स्यादिति भाष्य
विरोध इति चेदत्र केचित् सावकाशानपहारकादेशविषये यं न्यायो न प्रवर्तते भिन्धकीत्यत्र धादेशस्यास
वकाशापहारकत्वेनायं न्यायः प्रवर्तत एवेति न भाष्यविरोधः अतएव अनाप्यकरस्य ग्रहणं चरितार्थं अतए
व कृष्यर्थे न क्विमः कृदन्तस्यागतिं कृत्वादीक्षिते नैवं चरम एव इत्यवसेयः क्विमः कृदिति सूत्रकरणे न चाकृत्वि
शिष्टस्य क्वादेशः साधित इत्याहुः। परे तु भिंधकीत्यत्र तन्मध्यपतितत्वमेव नास्तीति न भाष्यविरोधः

तथाहि स्वघटकाव्यवहितपूर्वत्व स्वघटकाव्यवहितोत्तरत्व स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वैतत्त्रि
तयसंबंधेन स्वविशिष्टत्वं तन्मध्यपतितत्वं प्रकृते च तन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वस्याव्
यभावात् भाष्यविरोध इत्याहुः॥ केचित्तु त्यादिनाप्युक्तं तत्रत्युक्तं इमेऽभ्यशिष्यास्यसे सावकाशत्वान्नप
हारत्वलेनादेशस्य निर्दिश्यमानपरिभाषया अवनौ वकृ इति रूपं यथाश्रुतन्यासे सावकाशत्वापहारत्वले
नादेशस्य कृत्स्यस्थानिरूपमिति पूर्वभेदेन मनोरथाप्रसंगनेरित्याहुः॥ अन्ये तत्र बुद्धिविषय इत्यस्य यद्यपि
स्यादिः कार्यजननादित्यस्य तथाप्यंतरंगत्वाद्बुद्धिविषयत्वेन निर्दिश्यमानत्वाभावाधिकरणं न प्राप्नोतीति भाष्यप्रामा
ण्येन निर्दिश्यमानपरिभाषाप्रवर्तनमिति शेषः॥ नन्वेवमपि कृ इति सूत्रे ग्रहणं व्यर्थं इमवृने स्यादाम्याद्
दौ निर्दिश्यमानपरिभाषयैव वारणादिति चेदाह। इयं चावयवयवषष्ठीविषयेपीति। निर्दिश्यमा
नावयवत्वमुपलक्षणमिति स्वीकारेणावग्रहणं सार्थकमित्याहुः॥ तद्ध्येति षष्ठी प्रकृतिमन्यत्रा
र्थमिवोपस्थितिविषयघटितयोगिकं बुद्धेत्यर्थः॥ विषयेपीति अपिना स्थानषष्ठीविषयेपीत्यर्थः॥

अत एवेति। षष्ठी प्रकृतिमन्यत्रार्थमिवोपस्थितिविषयत्वमितियोगित्वसंबंधानुयोगित्वस्थानपदार्थाश्रयादे
शो भवतीति निर्दिश्यमानपरिभाषार्थस्वीकारादेवेत्यर्थः॥ अतिस्य इति। अतिशायनः स्योः तिस्य इति वि
ग्रहः॥ चेतेति। चित्र् चयने अस्मात्तृच्। प्रमाणतोंतर्यादेकारोपिस्यादिति। स्व मात्रिक सरूपप्रमाण
तआंतर्यादेकारोपिस्यादिति भावः॥ न चैव मात्रप्रमाणतोंतर्ये आदेशगतावच्छेदकत्ववैशिष्ट्यस्य स्वा
वच्छिन्नवृत्तित्व स्वावच्छिन्नेतरयावद्देशावृत्तित्व स्वावच्छिन्नघटितनदेतरदलीयवृत्तित्वोभयसं
बंधेन वैशिष्ट्य सत्त्वेपि स्वावच्छिन्नेतर स्वावच्छिन्नेतर स्वावच्छिन्नघटितदलीयत्वकारादिवृत्तित्व
स्यैव सत्त्वेन स्वावच्छिन्नेतर स्वावच्छिन्नघटितदलीय यावत्स्थान्यवृत्तित्वस्य अभावादिति वाच्यं
दीर्घेषु यण् सिध्या स्थानेंतरतम इति सतम्यंतपाठस्य भाष्ये दूषितत्वेन प्रथमांतपाठस्यैव सिद्धांतित
त्वात् स्थानेंतरतम इति परिभाषाविषयेआदेशतावच्छेदकरूपवैशिष्ट्यमेवृत्तिरुक्तत्रितयसंबंधेन
आंतर्यमिति स्वीकारेणादोषात्। यत्रेति। यत्रानेकविधेरांतर्यैरनेक आदेशाः प्राप्नुवंति तत्र स्थान

नत्वआंतर्यवानेवादेशो भवति। नान्यविधांतर्यवानिति भावः स्थानार्थगुणप्रमाणकृतमिति। स्थानकृतं अ
र्थकृतं गुणकृतं प्रमाणकृतं चेत्यर्थः नच प्रमाणस्यापि तत्त्वे दैवसिद्धे प्रमाणग्रहणवैयर्थ्यमिति वाच्यं ब्राह्मण
वसिष्ठन्यायेन पृथग्ग्रहणात्। नचैवमपि स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मबोध
नरूपविधेः पदार्थत्वानुपपत्तिः गुणत्वप्रमाणत्वयोरविरुद्धत्वादिति वाच्यं गुणत्वत्वप्रमाणत्वत्वादिकमादाय
विधेयपदार्थत्वोपपत्तेः एकदेशेति षष्ठी स्थानेऽत्र स्थानपद एव स्मारितं तत्प्रतीतिज्ञातानादिति भावः तन्नी
ति अनुवृत्तस्थानेपदमित्यर्थः वाक्यभेदेनेति यत्रैकविधमान्तर्यं तत्रादेशनियमार्थं स्थानेन्तरतम इति आ
वश्या वाक्यभेदेन व्याख्येयमिति भावः स्थानेन्तरतम इति। सार्वविभक्तिकस्तसिः अनेकविधान्तर्यसत्त्वागमकमि
ति अनेकविधमान्तर्यमादेशानां नियामकमिति यावत् तत्त्वागमकमित्यर्थः एतेनानेकविधान्तर्यस्य सत्त्वात्
कृत एकविशेषेण तत्त्वागमकत्वापेक्षेतीदमसंगतमित्यपास्तं न च हरिणानिमित्तावेकादेशवारणाय तमपग्रहण
मावश्यकमिति वाच्यं तत्स्थानेन्तरतम इति वा सस्थानेन्तरवा इति। न्यासेनसिद्धे स्थानेन्तरतम इति गुरुन्यासकरणेन भंग

[OrderDescription]
,CREATED=26.08.19 13:47
,TRANSFERRED=2019/08/26 at 14:14:50
,PAGES=118
,TYPE=STD
,NAME=S0001539
,Book Name=M-795-PARIBHASHENDUSHEKHAR TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF

FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF

FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,